अथप्रतिष्ठामयूखः प्रारभ्यते.

श्रीगणेशायनमः॥ ॥महोमहत्समाराध्यजलोत्सर्गमथोक्तवान्॥प्रतिष्ठांसर्वदेवानांनीलकंठोवदत्यसौ॥१॥ ॥तत्रतत्काला
विष्णुधर्मोत्तरे॥ ॥चैत्रेवाफाल्गुनेवापिज्येष्ठेवामाधवेतथा॥माघेवासर्वदेवानांप्रतिष्ठाशुभदासिते॥रिक्तान्यतिथिषुस्यात्सावा·
रेभौमान्यकेतथेति॥ तत्रैव॥आषाढेद्वेतथामूलमुत्तरात्रयमेवच॥ ज्येष्ठाश्रवणरोहिण्यःपूर्वाभाद्रपदास्तथा॥हस्तोश्विनीरेवती
चपुष्योमृगशिरस्तथा॥ अनूराधातथास्वातीप्रतिष्ठासुप्रशस्यतइति॥ अत्राषाढेद्वेइत्यनेनैवोत्तराषाढाप्राप्तावप्युत्तरात्रयपद
मुत्तराफाल्गुन्युत्तराभाद्रपदयोरर्थवत्॥ नारसिंहे॥ तथामहाश्विनोमासउत्तमःसर्वकामदः॥देवीतत्रसदाशक्रपांसुनापिप्र
तिष्ठिता॥भवेत्फलदापुंसांकर्कस्थेचवृषस्थिते॥नतिथिर्नचनक्षत्रंनोपवासोत्रकारणम्॥ मातृभैरववाराहनारसिंहत्रि
विक्रमाः॥महिषासुरहंत्र्यश्चस्थाप्यावैदक्षिणायने॥ कश्चिन्निषेधः॥ आर्द्रादिकेस्वातिविरामकालेनक्षत्रवृंदेदशकेस्थितेर्के॥वि
वाहचौलव्रतबंधदीक्षासुरप्रतिष्ठादिनकार्यमेवेति॥ अथसंभाराः॥ अर्कादिग्रहसमिधाप्रत्येकमष्टशतसंक्षेपपक्षे॥आज्य·
चर्वादिलोकपालादियागायपलाशादिसमिधाप्रत्येकमष्टसहस्रमष्टशतंवा॥ पुष्पमालाः॥कुंकुमं॥कर्पूरः॥कस्तूरी॥चंदनं॥
गुग्गुलुः॥धूपदहनपात्रं॥आरार्तिकं॥ घंटाः॥पादुका॥दर्पणं॥ बलिसामग्री॥ पायसभक्ष्यभोज्यनैवेद्यं॥ होमार्थमाज्यतिल·
यवाक्षतफलादिकं॥ प्रतिकुंडविष्टराश्चत्वारः॥ प्रतिकुंडस्रुक्स्रुवौ॥आसनानि॥त्रिसूत्री॥श्वेतोर्णासूत्रं॥सर्वतोभद्रादिरच·
नायश्वेतरक्तपीतनीलकृष्णवर्णकाः॥स्नपनकलशाः॥पल्लवाः॥कदलीस्तंभाः॥पताकादश॥ध्वजाश्चदश॥ तेषांवेणुदं·

5107

डा॥ वज्रमौक्तिकवैडूर्यशंखस्फटिकपुष्परागेंद्रनीलमहानीला इति रत्नाष्टकम्॥ हरितालकमनःशिलाभ्रककृष्णांजनमाक्षि
ककासीसस्वर्णमाक्षिकगैरिका इति धात्वष्टकं॥ तिलयवमुद्गगोधूमनीवारश्यामाकसर्षपव्रीह्य इति बीजाष्टकं॥ सुवर्णरजत-
ताम्रलोहत्रपुसीसरंगरीत्याख्यधात्वष्टकं॥ मधुपर्कपात्रं सौवर्णं ताम्रं वा अर्घपात्रं॥ शक्त्येकद्वित्रिमाषसुवर्णशलाका स्थाप
नीयकलशरत्नानि॥ षोडश द्वारकलशाः॥ अष्टौ लोकपालकलशाः॥ वेदिकलशाश्चत्वारः॥ वास्तुमंडलकलशः॥ कुंडकल
शाः कुंडसंख्यया॥ निद्राकलशः॥ स्नपनकलशाः॥ पंचचत्वारिंशत्॥ ४५॥ कलशसंख्यया शरावाणि॥ धारासहस्रान्वितौ
कलशौ॥ गजाश्वस्थापनवल्मीकसंगमकूलह्रदयवराहोत्खातराजद्वारमृदः॥ मुरामांसीवचाकुष्ठशैलेयहरिद्रादारुहरिद्राशठ
ीचंपकमुस्ता इति सर्वौषध्यः॥ पंचगव्यं पृथक् पृथक्॥ व्रीहियवतिलगोधूमनीवारश्यामाकमुद्गा इति सप्तधान्यानि शय्या
सोपस्करा॥ श्वेतवस्त्रं॥ चामरे॥ विचित्रवितानं॥ त्रयो दुकूलपट्टाः॥ ऋत्विग्वरणसामग्री॥ शिल्पिवस्त्रयुगमित्यादिसंभृतसं
भारो मूर्तिप्रतिष्ठादिनात्प्राक् सप्तमदिने पंचमदिने द्विदिने सद्यो वा प्रासादाग्रे मंडपं कृत्वा तन्मध्ये चतुरस्रां पंचहस्तां चतुर्हस्तां वा
हस्तोच्छ्रितां वेदीं मंडपोत्तरे चतुर्द्वारं स्नपनमंडपं तत्र वेदिकात्रयं कृत्वा शिल्पिस्थानात्प्रासादप्रादक्षिण्येन देवं तत्रानीयासनेनि-
धाय यजमानः प्राणानायम्य॥ मासा द्युल्लिख्यास्यां मूर्तौ लिंगे वा देवकलासान्निध्यार्थमायुः श्रीमर्वफलावाप्त्यर्थमुक्तरवकामईश्वरप्री-
तिकामो वा अमुकमूर्तेर्लिंगस्य वा प्रतिष्ठां करिष्य इति संकल्प्य गणपतिपूजनं पुण्याहवाचनं कृत्वा॥ प्रतिष्ठायाअंगभूतं श्राद्धं मे-

नत्कृदुर्लभं॥ यजमानात्मनःशक्यंकरिष्येमातृपूजनमितिमंत्रमुक्त्वामातृपूजनंनांदीश्राद्धंचकृत्वाचार्यंवृत्वाद्वात्रिंशत्षोडशा॰
ष्टौचतुरोवाऋत्विजोष्टौचतुरोवाद्वारपालान्वृत्वातान्संपूजयेन्मधुपर्कादिना॥ सदस्यवरणमप्यत्रेतित्रिविक्रमादयः॥ ततोमंत्रमूर्ति
र्भवान्नाथसंसारोच्छेदकारक॥ देवःपूजार्होयथास्यात्कुरुधर्मोद्भतिंचनः॥ संसारभयभीतेनअयंयज्ञःकृभाक्तितः॥प्रारब्धस्त्व
त्प्रसादेननिर्विघ्नंमेभवत्विति आचार्यंप्रार्थ्यसतूर्यघोषसपरिकरःसपूर्णकुंभोभद्रंकर्णेभिरितिमंत्रेणमहामंडपंप्रदक्षिणीकृत्यप॰
श्चिमद्वारेणप्रविशेत्॥ ॥तत्राचार्यः॥ ॥अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं॥ सर्वेषामविरोधेनब्रह्मकर्मसमारभइ॰
त्युक्त्वातत्रसर्षपान्विकीर्य देवाआयांतुयातुधानाअपयांतुविष्णोदेवयजनंरक्षस्वेतिरक्षांकृत्वा वेदिकाग्नेयकोणेस्थूणांवस्कृ॰
दायैनमः॥ वस्कृदामावाहयामि॥इत्यालभ्यस्रग्गंधपुष्पादिनार्चयेत्॥ ततःप्रादक्षिण्येन॥ भद्रायैनमः भद्रांआवाहयामि इति॰
द्वितीयां॥ अदित्यैनमःअदितींआवाहयामि॥ इतितृतीयां॥ नंदायैनमः नंदांआवाहयामि॥ इतिचतुर्थी॥ मंडपाग्नेयकोणे॥॰
भूत्यैनमःभूतिंआवाहयामि॥ इतिप्रथमां॥१॥ सरस्वत्यैनमःसरस्वतींआवाहयामि॥२॥ पूर्वसंध्यायैनमःपूर्वसंध्यांआवा
हयामि॥ ३॥ मध्यसंध्यायैनमः मध्यसंध्यांआवाहयामि॥ ४॥ पश्चिमसंध्यायैनमः पश्चिमसंध्यांआवाहयामि॥५॥ गायत्र्यै
नमःगायत्रींआवाहयामि॥ ६॥ सावित्र्यैनमःसावित्रींआवाहयामि॥७॥ बृहस्पतयेनमः बृहस्पतिंआवाहयामि॥८॥ अदित्यै
नमःअदितींआवाहयामि॥९॥विनतायैनमःविनतांआवाहयामि॥१०॥ पौर्णमास्यैनमःपौर्णमासींआवाहयामि॥११॥सिनीवा॰

स्यैनमः सिनीवालींआवाहयामि॥१२॥ इतिषोडशस्थूणाः स्पृष्ट्वापूजयेत्॥ नागमात्रेनमइतिबलिः कार्यः ॥ सर्वेभ्योनमइतिशा-
खोइंधनानिपूजयेत्॥ ततःपश्चिमद्वारेणनिर्गत्यपूर्वदिगादिद्वारतोरणपूजामारभेत्॥ तत्रप्राच्यांस्फ द्दतोरणायनमः॥अश्व-
त्थतोरणेनंयज्ञंरक्षसर्वविघ्नान्निवारयेतिपूजयेत्॥ अथत्रिशूलशृंगेषुप्रादक्षिण्येनेंद्रंधातारंभगमित्यादित्यन्यासंकुर्यात्॥ द्वा
रशाखयोर्ध्रुवमध्वरंचेतिवस्त्रद्वयमर्चयेत्॥ शाखामूलयोर्धान्यराश्योरुपरिरत्नगर्भौप्रशांतशिशिरनामानौकलशौप्रतिष्ठा-
प्यपूजयेत्॥ ततोद्वारदेशेइंद्रमावाह्यनमस्कृत्य इंद्रायाहिचित्रभानोइतिपीतांपताकांध्वजंचालभ्यत्रातारमिंद्रमितितोरणोप
रिनिदध्यात्॥ इंद्रायघृतोदनबलिदानं॥अग्निमीळइत्यृग्वेदंपूजयेत्॥ ऋग्वेदःपद्मपत्राक्षोगायत्रःसोमदैवतः॥अत्रिगोत्र-
स्त्वविभेंद्रऋत्विक्त्वंमेमखेभवेतिध्यानम्॥ तत्रश्रीसूक्तंपावमानंचसोमसूक्तंस्त्रमंगलं॥ पौरुषंरुद्रसूक्तंचक्षमदेव्यंतथैव-
चेतिद्वारपालजपः॥ अथाग्नेयकोणे॥अग्नयेनमइत्यग्निमावाह्यपूजयेत्॥अग्नआयाहीतिरक्तध्वजपताकालंभः॥त्वन्नो
अग्नइतिपताकोछ्रयः॥अग्निंदूतमितिघृतोदनबलिः॥याम्येस्फभद्रद्वारतोरणायनमः॥औदुंबरतोरणेन यज्ञंरक्षसर्ववि-
घ्नान्निवारयेतिपूजयेत्॥ शृंगेषुपूष्णेनमः॥मित्रायनमः॥वरुणायनमइत्यादित्यन्यासः॥ द्वारशाखयोः सोमायनमः॥ आ-
यायनमइतिवस्त्रद्वयमर्चयेत्॥शाखामूलयोःपर्जन्याशोकनामानौकुंभौप्रतिष्ठाप्यपूजयेत्॥ ततोद्वारदेशेयममावाह्यन-
मस्कृत्ययमायसोममितिश्यामध्वजपताकालंभः॥यमायमधुमत्तमंमितितोरणोपरिनिधानं॥माषभक्तबलिदानइषेत्वे-

तियजुर्वेदंपूजयेत्॥ कातराक्षोयजुर्वेदस्त्रैष्टुभोविष्णुदेवतः॥ काश्यपेयस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतियजुर्वेदध्यानम्॥
तत्र॥ आनोभद्राइत्यनुवाकश्चआयुःशिशानकस्तथा॥ यद्देवात्रीणिचपठेत्ततोष्टौचध्रुवंतुमां॥ अभिधाअसिसप्तैवदीर्घायुस्त्वेकं
चंपठेत्॥ आप्यायस्वषट्॥ नमोअस्तुसर्पेभ्यः॥आकृष्णेन॥ नमःशंभवेइत्येकाएकाग्निर्देवतोक्रमात्॥ त्रातारमिंद्रमित्ये
कांसोमंराजानमेकया॥ अन्नपतेमहांइंद्रःऋचंवाचंसमग्रकंपठेत्॥ अथनिर्ऋतौ॥ निर्ऋतयेनमइति निर्ऋतिमावाह्यपूज
येत्॥ मोषुणःपरापरेतिपताकालंभः॥अस्कन्नंतमितिध्वजपताकोच्छ्रयणम्॥ निर्ऋतिंसंपूज्य॥ मोषुणइतिकृष्णव्रीह्यन्नं
घृतसहितंबलिंदद्यात्॥ अथपश्चिमायां॥ स्कभीमतोरणायनमः॥ प्लक्षतोरणेनयज्ञंरक्षसर्वविघ्नान्निवारयेतिपूजयेत्
अथत्रिशूलेषु॥अर्यम्णेनमः॥अंशवेनमः॥ विवस्वतेनमइत्यादित्यन्यासः॥ द्वारशाखयोःअनिलायनमः॥अनलायन
मइतिवस्तुद्वयम्॥शाखामूलयोर्धान्यपुंजोपरि संजीवनामृतनामानौकुंभौप्रतिष्ठाप्यपूजयेत्॥ तत्रवरुणमावाह्यनमस्ते
त्यतत्वायामीतिश्वेतध्वजपताकालंभः॥उदुत्तमंवरुणेतितोरणोपरिनिधानम्॥ नवनीतोदनबलिदानम्॥ अग्नआयाही
तिसामवेदंपूजयेत्॥ सामवेदस्तुपिंगाक्षोजागतःशक्रदैवतः॥भारद्वाजस्तुविप्रेंद्रऋत्विक्त्वंमेमखेभवेतिसामवेद
ध्यानं॥ तत्रजपः॥ इंद्रायसामगायतः॥अहमस्मिप्रथमजा॥ सेतूंस्तर॥ स्वादिष्ठया॥ गायंतित्वागायत्रिणः॥कस्यनूनं
कतमस्यामृतानामित्यादि॥ अथवायव्ये॥ वायवेनमइतिवायुमावाह्यपूजयेत्॥ वायोयेतेतिधूम्रध्वजपताकालंभः॥

तववायव्यतस्यतइतिपताकोच्छ्रयणम्॥ वायुंसंपूज्ययवौदनबलिदानम्॥ अथोत्तरे। स्कभभायतोरणायनमः॥ शन्नोदेवी
तितोरणालंभः॥ न्यग्रोधतोरणेनयज्ञंरक्षसर्वविघ्नान्निवारयेतिपूजयेत्॥ शृंगेषुत्वष्ट्रेनमः॥ सवित्रेनमः॥ विष्णवेनमःइ
त्यादिन्यासः॥ द्वारशाखयोः॥ प्रत्यूषायनमः॥ प्रभासायनमइतिवस्त्रद्वयम्॥ शाखामूलयोर्धनदश्रीप्रदनामानौकुंभौ
प्रतिष्ठाप्यपूजयेत्॥ अत्रसोममावाह्यनमस्तुस्त्सोमोधेनुमितिस्कवर्णवर्णध्वजपताकालंभः॥ वयंसोमेतितोरणोपरि
निधानम्॥ प्रैयंगवबलिदानं॥ शन्नोदेवीरित्यथर्ववेदंपूजयेत्॥ स्कवर्णनयनोथर्वानुष्टुप्छंदः पुरंदरः॥ वेदोवैतानगो
त्रस्त्कऋत्विकृत्वमेमखेभवेतितत्ध्यानम्॥ अथर्वांगिरसंचैवअथर्वशिरसंतथा॥ शांत्यध्यायंचपठेत्॥ अथैशान्येईशा
नायनमइतीशानमावाह्यपूजयेत्॥ नमःशंभवेइतिरक्तध्वजपताकालंभः॥ तमीशानमित्युच्छ्रयः॥ गावेधुकबलिः॥ ॥
ईशानपूर्वयोर्मध्ये॥ अनंतायनमइत्यनंतमावाह्यपूजयेत्॥ नमोअस्तुसर्पेभ्यइतिमेघवर्णध्वजपताकालंभः॥ तद्वि-
ष्णोरित्युच्छ्रयः॥ विष्णोर्नुकमितिबलिदानम्॥ पश्चिमनिर्ऋतिमध्ये॥ ब्रह्मणेनमइत्यावाह्यपूजयेत्॥ यद्देवादेवहेडन
मितिरक्तध्वजपताकालंभः॥ ब्रह्मजज्ञानमितिउच्छ्रयः॥ सनोभुवनस्यपतिःइतिपायसबलिदानम्॥ प्राच्यांगणानांत्वे
तिगणेशंसंपूज्य॥ नमोस्तुरुद्रेभ्योयेअंतरिक्षेइति॥ मंडपाद्बहिर्दिग्विदिक्षुरुद्रान्संस्थाप्यतेभ्योबलिंदत्वायेकेचित्त्विह
लोकेषुआगताबलिकांक्षिणः॥ तेभ्योबलिंप्रयच्छामिनमस्तुस्त्पुनःपुनरितीशान्यांसर्वेभ्योनमइतिबलिंदत्वाचामेत्॥

॥ इति मंडपपूजा ॥ ॥ अथ गुरुर्महावेद्यां सर्वतोभद्रदेवताः सामान्यप्रयोगोक्ता आवाह्य संपूज्य स्वकुंडेऽग्निं स्थापयेत् ॥ त-
तः सर्वेऽपि होतारस्तमेवाग्निं स्वस्वकुंडे प्रणयेयुः ॥ ततो गुरुः प्रासादांतरीशान्यां नैर्ऋत्यां वा हस्तमितवेद्यां चतुःषष्टिपदे वास्तु-
पीठे सामान्यप्रयोगोक्ताः शिख्यादिदेवता आवाह्य संपूज्य ताभ्यो बलिं दद्यात् ॥ कुंडेषु स्वस्वशाखीयपूर्वांगोत्तरं होतारः प्रति-
दैवतमष्टोत्तरसहस्रमष्टोत्तरशतमष्टाविंशतिमष्टौ वा प्रत्येकं समित्तिलाज्यैः कुंडसंख्यया विभज्य जुहुयुर्नाममंत्रैः ॥ ततः
पंचसंख्यया पंचविंशतिसंख्यया वा बिल्वैस्तद्बीजैर्वा वास्तोष्पत इति चतसृभिः वास्तोष्पते ध्रुवा स्थूणामिति चतुर्हुत्वा अघो-
रेभ्योऽथ घोरेभ्य इत्याज्येनाष्टोत्तरसहस्रमष्टोत्तरशतं वा वास्तुमर्मसंधानाय जुहुयुः ॥ ततो रक्षोघ्नपावमानसूक्ताभ्यां त्रिसू-
त्र्या प्रासादं वेष्टयपरितो जलदुग्धयोः पृथगविच्छिन्ने धारे दत्त्वा पीठे पूजितां हैमीं वास्तुप्रतिमां दधिदूर्वासप्तधान्यशैवालगं-
धाक्षतपुष्पयुते पक्वमृद्भांडे संस्थाप्य तत् पिधाय चतुःषष्टिधा भाजितप्रासादाग्नेयकोणे कोपपदादुत्तरे आकाशपदे जानुमा-
त्रं गर्तं कृत्वा जलेनापूर्य गंधपुष्पाणि प्रक्षिप्य मृद्भांडं तत्र निधाय गर्तं तथैव मृदा पूरयेत् ॥ मृदआधिक्ये शुभं ॥ इत्थं वास्तुपूजां कृ-
त्वा गुरुर्मंडपेशानभागे वेद्यां ग्रहान् अधिदेवताः प्रत्यधिदेवता विनायकादीन् पंच लोकपालांश्चावाह्य संपूजयेत् ॥ ततो ऋत्वि-
जः समिच्चर्वाज्यैरष्टोत्तरसहस्रमष्टोत्तरशताष्टाविंशत्यष्टान्यतमसंख्यया कुंडेषु विभज्य हुत्वा बलीन्दत्त्वा पूर्णाहुतिं जुहुयुः
एतन्मंत्रप्रकारादिकं सामान्यप्रयोगे उक्तम् ॥ अथ गुरुः स्नानमंडपे ॥ ॐ नमो नारायणायेत्यभिमंत्रितपंचगव्येन भूमिं वे-

दिकात्रयंचसंप्रोक्ष्य॥ तत्रदक्षिणवेदिकायामास्तृतवालुकायामक्षतैः स्वस्तिकंकृत्वातत्रचभद्रपीठंनिधाय वेदिकायाः पश्चा-
द्वारिपूर्णान्सपल्लवान्षट्कलशान् मृसल्लववृक्षीयकषायगोमूत्रगोमयभस्मगंधोदकैः मपूर्यउदकसंस्थपंक्तिरूपेणा-
च्छादयेत्॥ तत्रान्यस्थपतिकलशाः भद्रपीठयुतमध्यवेदिकापश्चिमे एवंस्थपतिकलशातिरिक्ताएकादश भद्रपीठोत्तर
वेद्यास्तुपरितोष्टौकलशान्पूर्वादिक्रमेण क्षारोदक क्षीरदधि सर्पिः सुरा इक्षुरस दूर्वोदक दर्भोदकयुतान्हिरण्यग-
र्भाद्यैरष्टभिर्मंत्रैर्विन्यसेत्॥ ततोन्येचवेद्याः पश्चिमभागे मृत्तिका गोमूत्र गोमय भस्म मिलितपञ्चगव्य क्षीरदधिघृत श
र्करायुतदशकलशाः॥ चतुर्दशशङ्खजलकलशाः अथान्यस्पंचत्रिंशत्कलशानासादयेत्॥ तत्रपंचसु पृथक्पंचामृतानि
पंचसुजलंपंचसुपल्लवकषायः दशसुक्रमात् पुष्पैःफलैः सौवर्णजलेन गोशृंगोदकेनधान्यैः सहस्रच्छिद्रैः सर्वौषधि-
भिः॥ पंचपल्लवैःदूर्वाभिर्नवयुताः कार्याः अवशिष्टेषु दशसु शङ्खजलमापूर्य लोकपालानावाह्य सर्वेष्वाकलशेष्वित्यनेन-
स्थाप्याः॥ सूक्ष्मवस्त्रं सुगंधतैलं यवचूर्णमुद्वर्तनार्थमामलकीचूर्णं सुगंधं जटामांसिंचासादयेत्॥ तदनंतेतीर्थोदककल
शे सर्वेसमुद्राः सरितस्तीर्थानि जलदानदाः॥ आयांतुयजमानस्यदुरितक्षयकारकाः॥ इत्यादितीर्थान्यावाहयेत्॥ ततः स
यजमानआचार्योमूर्तिस्थपतिभ्यां सहसुमंगलघोषं कर्मकुटींगत्वा भूमावुपलिप्य विधिवदग्निंस्थापयित्वा प्रतिमानिर्मा
णे प्रमाणवधादिदोषनिरासार्थं घृतेनतिलैर्वा होमंकरिष्ये इतिसंकल्प्याज्यभागांतंकृत्वा देवमंत्रेणाज्याहुतिशतद्वयंहुत्वा

पूर्णाहुतिंहुत्वा प्रतिमांकुशैः संमार्ज्य मधुघृताभ्यंगेनदेवस्यव्रणभंगंकृत्वा पंचगव्येनपृथक् पृथक् स्नापयित्वा पुनःसंपूज्य-
शंखवादेनरथादिनादेवंमहामंडपप्रादक्षिण्येन स्नानमंडपमानयेत्॥ तत्रगुरुर्दक्षिणवेद्यांभद्रंकर्णेभिरिति प्राङ्मुखंदेवंभ
द्रासनेनिवेश्य पूर्वकल्पितषट्कलशेष्वंत्यंहिरण्यादिसहितंकलशंदेवसमीपेनिधाय काशीकुशस्थलीमायावंत्ययोध्या·
मथोःपुरी॥शालिग्रामंसगोकर्णंनर्मदाचसरस्वती॥तीर्थान्येतानिकुंभेस्मिन्विशंतुब्रह्मशासनात्॥ झषारूढासरोजाक्षी
पद्महस्ताशशिप्रभा॥ आगच्छतुसरिज्ज्येष्ठागंगापापप्रणाशिनी॥नीलोत्पलदलश्यामापद्महस्ताबुजेक्षणा॥आयातुय·
मुनादेवीकूर्मयानस्थितासदा॥प्राचीसरस्वतीपुण्यापयोष्णीगौतमीतथा॥ऊर्मिलाचंद्रभागाचसरयूगंडकीतथा॥जंबुका
चशतद्रुश्चकुलिकासप्रभातथा॥वितस्ताचविपाशाचशर्मदाचपुनःपुनः॥ गोदावरीमहावर्ताशर्करावर्तमार्जनी॥ कावे
रीकौशिकीचैवतृतीयाचमहानदी॥चिटंकाप्रतिकूलाचसोमनंदाचविश्रुता॥ करतोयावेत्रवतीदेविकावेणुकाचया॥
आत्रेयगंगावैतरणीकाश्मिरीन्ह्रादिनीचया॥ प्लाविनीचशबत्रासाकल्माषाशंसिनीतथा॥ वसिष्ठाचअपापाचसिंधु·
वत्यारुणीतथा॥ताम्राचैवत्रिसंध्याचतथामंदाकिनीपरा॥ तैलकाद्रीचपाराचदुंदुभिर्नाकुलीतथा॥ नीलगंधाचबोधाच
पूर्णचंद्राशशिप्रभा॥अमरेशंप्रभासंचनैमिषंपुष्करंतथा॥आषाढीडिंडिभारत्नंभारभूतंबलाकुलम्॥ हरिश्चंद्रंपरंगुह्यं
मध्यंमध्यमकेश्वरं॥ श्रीपर्वतंसमाख्यातंजलेश्वरमतःपरं॥आम्रातकेश्वरंचैवमहाकालंतथैवच॥ केदारमुत्तमंगुह्यं·

महाभैरवमेवच॥ गयाचैवकुरुक्षेत्रंगुह्यंकनखलंतथा॥ विमलंचंद्रहासंचमाहेंद्रंभीममष्टमं॥ वस्त्रापदंरुद्रकोटिंअविमु-
क्तंमहालयम्॥ गोकर्णंभद्रकर्णंचहेमासंस्थानमष्टमम्॥ छागलाण्डंद्विरंडंचककेठिंमंडलेश्वरम्॥ कालंजरवनंचैवदेव-
दारुवनंतथा॥ शंकुकर्णंतथैवेहस्थलेश्वरमतःपरम्॥ एतान्यष्टौतीर्थानिगुह्यक्षेत्राणिसर्वशः॥ तानिसर्वाणिकुंभेऽस्मि-
न्विशंतुब्रह्मशासनादिति॥ मंत्रेणतीर्थानितत्रावाह्य॥ देवंस्नापयेत्॥ यजमानश्चशिल्पिवर्गंयथाशक्तिपूजयेत्॥ ततो
गुरुर्बहिर्निर्गत्यसिद्धार्थघृतपायसैस्त्र्यंबकमितिमागादिदिक्षुबलिंदत्वाचम्यदेवसमीपमागत्य त्रातारमिंद्रमित्यादिद-
शलोकपालमंत्रैर्मंडपांतर्दिक्षुरक्षांकृत्वा देवस्याग्रेचतुरोब्राह्मणानुपवेश्यस्वस्तिवाचयेत्तेभ्यश्चदक्षिणांदत्वादेवंस्नापयेत्।
अग्निर्मूर्धेतिमृदा यज्ञायज्ञावइतिकषायैः गायत्र्यागोमूत्रेण गंधद्वारामितिगोमयेन मानस्तोकइतिभस्मना तत्सवितुरि-
तिगंधतोयेन॥ ततःपंचकलशेनपंचदेवत्यैः नमःशंभवेतिप्रथमेन॥ हंसःशुचिषदितिद्वितीयेन॥ यातेरुद्रेतितृतीयेन
विष्णोरराटेतिचतुर्थेन॥ ब्रह्मजज्ञानमितिपंचमेन॥ संस्नाप्य॥ शतंजीवेतिदूर्वाक्षतपुष्पैः संपूज्य॥ वस्त्रेणाच्छाद्यद्वितीयवे-
द्यांभद्रंकर्णेभिरितिमंत्रेणभद्रासनंनिधाय॥ स्तीर्णंबर्हिरितिप्रागग्रान्कुशान्नास्तीर्य॥ तत्रप्रणवेनदेवंनिधायप्राङ्मुखउद-
ङ्मुखोभूत्वा॥ कुंकुमाक्तेनसूत्रेणलिंगमावेष्ट्य प्रतिमायामुखंलिंगस्यचनेत्राणिस्वर्णशलाकयाचित्रंदेवानामित्यर्धर्चे-
नेकल्पयेत्॥ ऊर्ध्वाधःपृथग्भूतंपद्मपुटद्वयंचाकृष्णेनेतिकल्पयेत्॥ नेत्रमध्येत्रिभागेनकनीनिकामितिकल्पयेत्॥

तदानकश्चित्पुरतस्तिष्ठेत्॥ सुवर्णपायसंप्राश्यगो ज्यमादर्शंचशीघ्रंदर्शयेत्॥ ततःशिल्पीलोहेनोल्लिखेत्॥ गुरुर्मधुसर्पि-
र्भ्यामभ्यज्येमंमेगंगेइति मंत्रेणाभ्यज्य पुनर्मृद्गोमयाभ्यांस्नापयेत्॥ यजमानःसुवर्णशलाकांस्नानवस्त्रादिकंचशिल्पि
नेदत्वा सहिरण्यांगांगुरवेदद्यात्॥ गुरुरुत्तरस्यांवेद्यांभद्रासनेदेवंस्थापयित्वा॥ कलशेनसमुद्रज्येष्ठाइतिसंस्नाप्य
संपूज्य दूर्वाक्षतान्मूर्ध्निदत्वा प्रार्थयेत्। नमस्ते देवदेवेश॥ निष्कृते विश्वकर्मणः प्रभावितशेषजगद्धात्रि तुभ्यंनमोन
मः॥ त्वयिसंपूजयामीशनारायणमनामयं॥ रहिताशेषदोषेश्च ऋद्धियुक्तासदाभवेति॥ ततोदेवस्यदक्षिणहस्तेप्र
तिमाविवरस्ति मात्रमूर्णासूत्रं कनिक्रदादिति मंत्रेणबध्नीयात्॥ सर्वसत्वमयंशांतंपरंब्रह्मसनातनम्॥ त्वामेवालंकरिष्या
मित्वंवंद्योभवतेनमः इतिपठित्वा चतुर्भिःकलशैःस्नपयेत्॥ इदमापइत्याद्येन॥ आपोदेवीरितिद्वितीयेन॥ इमंमे
गंगेइति तृतीयेन॥ तत्वायामीतिचतुर्थेन॥ ततोग्निर्मूर्धेत्यष्टपलमृत्तिकाकलशेनवरुणस्योत्तंभनमसीतिशुद्धोद
केन॥ तत्सवितुरितिद्वादशपलगोमूत्रकलशेन॥ आपोहिष्ठेतिशुद्धोदकेन॥ प्रसद्येतिमुष्टिसंमितभस्मकलशोदकेन॥ यो
वइतिशुद्धोदकेन॥ पयःपृथिव्यामितित्रिपलसंमितपंचगव्यकलशोदकेन॥ देवीरापइतिशुद्धोदकेन॥ आप्यायस्वेतिषो
डशपलक्षीरकुंभेन॥ तस्माअरंगमामवइतिशुद्धोदकेन॥ दधिक्राव्णाइतिपंचविंशतिपलदधिकुंभेन॥ युंजानइतिउदकेन॥
घृतवतीतिसप्तपलघृतकुंभेन॥ देवस्यत्वेतिजलेन॥ मधुवाताइतित्रिपलमधुकुंभेन॥ आपोअस्मानितिजलेन॥ आयंगो-

॥ स्नगंधतैलेनाभ्यज्य॥ द्रुपदादिवे
रितित्रिपलशर्कराकुंभेन॥ आपोहयद्बृहतीइत्युदकेनप्रक्षाल्य॥ यज्ञायज्ञावइतिवस्त्रेणसंमार्ज्य॥ स्नगंधतैलेनाभ्यज्य॥ द्रुपदादिवे
रितित्रिपलशर्कराकुंभेन॥ आपोहयद्बृहतीइत्युदकेनप्रक्षाल्य॥
तियवशालिगोधूममसूरबिल्वचूर्णैरुद्वर्त्य॥ यातेरुद्रशिवातनूरितियक्षकर्दमेनानुलिंपेत्॥ यक्षकर्दमस्तु॥ कस्तूरिकाया द्वौ
भागौ द्वौभागौकुंकुमस्यचंदनस्यत्रयोभागाः॥ शशिनस्त्वेकएवहीत्युक्तः॥ ततोजटामांस्यानुलिप्य॥ मानस्तोकेप्रतद्विष्णुरि
तिकलशद्वयेनस्नापयित्वा॥ अपामसोममितिपंचामृतेन॥ अयंराजावरुणोनुमन्यतांविशेषयथासंक्षेपयाँसि॥ आप्यायस्वमादं
तमसोमविश्वाभिरूतिभिः॥ अप्स्वग्नेसधिष्टवइतिपंचभिः क्षालयेत्॥ गंधद्वारामितिगंधोदकेन॥ यज्ञायज्ञावइतिपंचपल्लव·
कषायकलशेन॥ याओषधीरितिओषधिकलशेन॥ ओषधीरितिसितपुष्पकलशेन॥ शांताप्टथिवीतिशांत्युदककलशेन॥ याः
फलिनीरित्यष्टफलकलशेन॥ हिरण्यगर्भइतिस्नवर्णकलशोदकेन॥ हविष्मतीरितिशृंगोदकेन॥ धान्यमसीतिधान्योदकेन॥
सहस्राक्षमितिसहस्रधाराकलशोदकेन॥ यादिव्याइतिसर्वौषधिजलेन॥ नमोऽस्तुसर्पेभ्यइतिपंचपल्लवोदकेन॥ अष्टौव्यख्य
त्ककुभइतिरत्नोदकेन॥ इमंमेगंगेइतितीर्थोदकेन॥ पुनरष्टाभिः कलशैः पूर्वकल्पितैः ससुद्रसंज्ञितैः स्नपयेत्॥ कयानश्चित्रभि
तिक्षारोदकेन॥ आप्यायस्वेतिक्षीरकुंभेन॥ दधिक्राव्णइतिदधिकुंभेन॥ घृतंवतीतिघृतकुंभेन॥ पयः पृथिव्यामितिइक्षुरस·
कुंभेन॥ देवंबर्हिरितिस्नरोदककुंभेन॥ स्वादिष्टयेतिस्वादूदकेन॥ सरस्वतीयोन्यामितिगर्भोदकस्यपुनर्दशभिर्लोकपालक·
लशैः स्नापयेत्॥ तत्रत्रातारमितिकदंबपल्लवकुंभोदकेन॥ त्वन्नो अग्नेइतिशाल्मलिपल्लवेन॥ स्नगंन्नःपंथेतिजंबूपल्लवेन॥

असुन्वंतमितिअशोकपल्लवेन॥ तत्त्वायामीतिप्लक्षपल्लवेन॥ सुगंन्नःपंथेतिजंबूपल्लवेन॥ असुन्वंतमितिअशोकपल्लवेन॥
तत्त्वायामीतिप्लक्षपल्लवेन॥ यायोयेतइतिचूतपल्लवेन॥ वयंसोमेतिवटपल्लवेन॥ तमीशानमितिबिल्वपल्लवेन॥ नमोस्तुसर्पे
भ्यइतिनागपल्लवेन॥ ब्रह्मजज्ञानमितिपलाशपल्लवेन॥ ततःसुमंगलघोषैश्चतुर्भिःकुंभैरेकेनवाकुंभोदकेनदेवंस्नापयित्वा
सुगंधिनासितवस्त्रेणपरिमृज्यविश्वतश्चक्षुरितिसंकलीकृत्यदेवमावाहयेत्॥ एह्येहिभगवन्विष्णोलोकानुग्रहकाम्यया
यज्ञभागंगृहाणेमंवासुदेवनमोस्तुते॥ हिरण्यवर्णेतिपाद्यमर्घ्यं॥ विभ्राडित्याचमनीयं॥ त्र्यंबकमितिचंदनादि॥ वेदाहमि-
सुपवीतम्॥ युवासुवासेतिवस्त्रं॥ वेदाहमित्युत्तरीयम्॥ इदंविष्णुरितिपुष्पम्॥ धूरसीतिधूपं॥ चंद्रमामनसःइतिदीपम्॥
अन्नपतेइतिनैवेद्यं॥ आचमनंपुष्पांजलिंदत्वाप्रार्थनांकृत्वास्नानवस्त्रनैवेद्यादिकंशिल्पिनेदद्यात्॥ इतिदेवस्नपनविधिः
॥ अथपुरुषसूक्तेनस्तुत्वा॥ उत्तिष्ठोत्तिष्ठगोविंदत्यजनिद्रांजगत्पते॥ त्वयिसुप्तेजगत्सुप्तंउत्थितेचोत्थितंजगदिति॥ तमुत्था
प्यरथमारोप्यप्रासादप्रादक्षिण्येनानीय॥ यागमंडपपश्चिमद्वारि॥ आकृष्णेनेतिप्रवेश्य॥ वेद्याःपश्चिमभागेउपवेश्यमधु
पर्कंकुर्यात्॥ ततोवेद्यांकुशानास्तीर्यतदुपरिशय्यामास्तीर्य॥ वेद्याःपूर्वादिदिक्षुविष्णुमधुसूदनत्रिविक्रमवामनानाग्ने-
यकोणेषुश्रीधरहृषीकेशपद्मनाभदामोदरांश्चपूजयेत्॥ शिवादिप्रतिष्ठायांतुनमःशंभवेइतिशय्यांनिवेश्य॥ पूर्वादिदि-
क्षु॥ भवंशर्वमीशानंपशुपतिं॥ आग्नेयादिकोणेषुरुद्रंउग्रंभीममहांतंचपूजयेत्॥ ततःशय्यायांदेवंस्थापयित्वा॥ त्रिभि-

वस्त्रैर्देवमाच्छाद्य॥ देवस्यशिरोदेशेभूमौसहिरण्यंनिद्राकलशंनमोदेवीरूपक्ष्ययेइतिआप्यायस्वेतिमधुसर्पिभ्यांदेवमभ्यज्य
यातेरुद्रेतितिलसर्षपैःउपलिप्यगंधादिनाभ्यर्च्य बृहस्पतेपरीतिसितंपरिधानंदद्यात् अत्रदेवस्य बृहस्पतेपरीतिमंत्रे
णहस्तेकंकणबंधनमित्येके॥ ततोदेवस्यपादनाभिवक्षःशिरस्सु विश्वतश्चक्षुरित्यालंभनं॥ ततस्तद्दक्षिणपार्श्वेछ
त्रंव्यजनं॥ चरणदेशेपादुका॥ पार्श्वयोःशांतिकुंभौ॥आसनदर्पणघंटाभक्ष्यभोज्यजलपात्रादिकंचदेवस्यपुरतःस्थाप
येत्॥भूतेभ्यःभस्म॥ दर्भैस्तिलैर्देवस्यपरितोरक्षार्थंप्राकारत्रयंकृत्वामंडपाद्बहिर्गत्वाप्रतिदिशंलोकपालेभ्योगंधादिपू
र्वकंबलिंदत्वाभूतेभ्यश्चत्र्यंबकमिति बलिमंत्रस्तु॥ पूर्वदिग्वासिभ्योदिक्पतिभूताधिपतिदिग्रुद्रदिङ्मातृदिक्क्षेत्रपालि
भ्योनमइत्येवंप्रतिदिशं॥ ततःआचम्य होमंकुर्यात्॥ तद्यथा॥ॐपरायविष्णवात्मनेनमःस्वाहेतिविष्णवे॥अन्यदेवतायां
शिवात्मनेनमइत्याद्यूहः॥अनेनाष्टोत्तरशतमष्टाविंशतिरष्टौवातिलैर्यवैर्वाप्रत्येकंहुत्वाप्रतिमायांन्यासंकुर्यात्॥अंपाद
योः॥उंहृदये॥मंललाटे॥इतिप्रणवंन्यसेत्॥ भूःपादयोः॥भुवःहृदये॥स्वर्ललाटे॥इतिव्याहृतीर्न्यसेत्॥अंतालुके॥
आंमुखे॥इंदक्षिणनेत्रे॥ईंवामनेत्रे॥उंदक्षिणकर्णे॥ऊंवामकर्णे॥ ऋंदक्षिणगंडे॥ॠंवामगंडे॥लृंदक्षिणनासापुटे॥
लॄंवामनासापुटे॥एंऊर्ध्वोष्ठे॥ऐंअधरोष्ठे॥ओंऊर्ध्वदंतपंक्तौ॥औंअधोदंतपंक्तौ॥अंललाटे॥अःजिह्वायां॥ यंत्वचि॥रंच
क्षुषोः॥लंनासिकायां॥वंदशनेषु॥शंश्रोत्रयोः॥षंउदरे॥ संकटौ॥ हंहृदये॥क्षंनाभ्यां॥लंलिंगे॥ पंफंबंभंमंदक्षिणबाहौ

नंथंदंधंनंवामबाहौ॥ टंठंडंढंणंदक्षिणजंघायां॥ चंछंजंझंञंवामजंघायां॥ कंखंगंघंङं सर्वांगुलिषु॥ इतिमातृकान्यासः॥
अं रविचंद्राभ्यांनेत्रयोः॥भौमायहृदये॥ बुधायस्कंधे॥ बृहस्पतयेजिह्वायां॥ शुक्रायलिंगे॥शनैश्चरायललाटे॥राहवे
पादयोः॥ केतुभ्यः केशेषु॥ रोहिणीभ्योहृदये॥ मृगशिरसेशिरसि॥आर्द्रायैकेशेषु॥पुनर्वसवेललाटे॥पुष्यायमुखे॥ आश्ले
षाभ्योनासायां॥ मघाभ्योदंतेषु॥पूर्वाफाल्गुनिभ्योदक्षिणकर्णे॥उत्तराफाल्गुनिभ्योवामकर्णे॥ हस्तायहस्तयोः॥ चित्रायैद-
क्षिणभुजे॥ स्वात्यैवामभुजे॥विशाखाअनुराधाभ्यस्तनयोः॥ज्येष्ठाभ्योदक्षिणकुक्षौ॥ मूलायवामकुक्षौ॥ पूर्वाषाढाभ्यः क
ठिपार्श्वयोः॥उत्तराषाढाभ्योलिंगे॥ श्रवणधनिष्ठाभ्योवृषणे॥शतभिषेभ्योनेत्रे॥ पूर्वाभाद्रपदाउत्तराभाद्रपदाभ्योऊर्वोः॥रे
वतीभ्यो ऽश्विनीभ्योजंघयोः॥ भरणिकृत्तिकाभ्यः पादयोः॥ ध्रुवायनाभ्यां॥ सप्तर्षिभ्यः कंठे॥ मातृकामंडलायनमः कटिदेशे॥
विष्णुपदेभ्यः पादयोः॥ नागवीथ्यैअंगवीथ्यैवनमालायां॥ ताराभ्योरोमकूपेषु॥अगस्त्यायकौस्तुभे॥ इतिग्रहादिन्यासः॥
चैत्रायनमः शिरसि॥ वैशाखायमुखे॥ज्येष्ठायहृदये॥आषाढायश्रावणायस्तनयोः॥ भाद्रपदायउदरे॥आश्विनायकट्यां॥
कार्तिकायमार्गशीर्षायऊर्वोः॥ पौषायमाघायजंघयोः॥फाल्गुनायपादयोः॥ संवत्सरायपरिवत्सराय इडावत्सरायवत्सरा
यनमः इति दक्षिणोर्ध्वांत्॥ प्रादक्षिण्येनचतुर्षुबाहुषु॥ पर्वतेभ्योनमः संधिषु॥ ऋतुभ्योलिंगे॥अहोरात्रेभ्योऽस्थिषु॥ क्षणा-
यलवायकाष्ठायैरोमसु॥ कृतायमुखे॥ त्रेतायैहृदये॥ द्वापरायनितंबे॥ कलियुगायनमः पादयोः॥ मन्वंतरेभ्योबाहवे॥प

रायपरार्धायजंघयोः महाकल्पायशरीरे उदगयनायदक्षिणायनायपादयोः विषुवतेसर्वांगुलीषु इतिकालन्यासः ब्राह्मणाय
मुखे क्षत्रीयायबाह्वोः वैश्यायऊर्वोः शूद्रायपादयोः संकरजेभ्योनमःपादाग्रे अनुलोमजेभ्योनमःसर्वांगसंधिषु गोभ्योनमःमुखे
अजाविकाभ्योनमःहस्तयोः ग्राम्यारण्यपशुभ्योनमःसर्वत्र इतिवर्णन्यासः मेघेभ्योनमःकेशेषु अब्भ्योनमःरोमसु नदीभ्योनमः
सर्वगात्रेषु समुद्रेभ्योनमःकुक्षिदेशे इतितोयन्यासः ऋग्वेदायनमःशिरसि यजुर्वेदायनमोदक्षिणभुजे सामवेदायनमोवामभुजे स
र्वोपनिषद्भ्योनमःहृदये इतिहासपुराणेभ्योनमःजंघयोः अथर्वांगिरसेभ्योनमःनाभौ कल्पसूत्रेभ्योनमःपादयोः व्याकरणायवक्त्रे
तर्केभ्यःकंठे मीमांसायैनिरुक्तायहृदये छंदोज्योतिःशास्त्रेभ्योनमःनेत्रयोः गीतभूतशास्त्रेभ्योनमःश्रोत्रयोः आयुर्वेदायदक्षिणभु
जे धनुर्वेदायनमोवामभुजे योगशास्त्रेभ्योनमःहृदये नीतिशास्त्रेभ्योनमःपादयोः वश्यतंत्रायनमःओष्ठयोः इतिविद्यान्यासः दि
वेनमःमूर्ध्नि सूर्यचंद्रलोकायनमोनेत्रयोः अनिललोकायनमोघ्राणे व्योम्नेनमःनाभ्यां समुद्रेभ्योनमोवस्तिदेशे पृथिव्यैनमःपादयोः
इतिवैराजन्यासः हिरण्यगर्भायनमःशिरसि कृष्णायनमःकेशेषु रुद्रायनमोललाटे यमायनमोभ्रुकुट्याम् अश्विभ्यांनमःकर्णयोः
वैश्वानरायमुखे मरुद्भ्योनमोघ्राणे वसुभ्योनमःकंठे रुद्रेभ्योनमःदंते सरस्वत्यैनमःजिह्वायां इंद्रायनमःदक्षिणभुजे बलयेनमोवा
मभुजे प्रह्लादाय॰दक्षिणस्तने विश्वकर्मणेवामस्तने नारदायदक्षिणकुक्षौ अनंतादिभ्यो॰वामकुक्षौ वरुणायहस्तयोः मित्राय॰पादयोः विश्वेभ्योदेवे
भ्योनमःऊरुमध्ये पितृभ्योनमःजानुमध्ये यक्षेभ्योनमःजंघयोः राक्षसेभ्योनमःगुल्फयोः पिशाचेभ्योनमःदक्षिणपादे असुरेभ्योन

म:वामपादे विद्याधरेभ्योनम:पादयो: ग्रहेभ्योनम:पादतलयो: गुत्यकेभ्योनम:गुदे पूतनादिभ्योनम:नरवेषु गंधर्वेभ्यो॰ओष्ठयो:
म:वामपादे विद्याधरेभ्योनम:पादयो: ग्रहेभ्योनम:पादतलयो: गुह्यकेभ्योनम:गुदे पूतनादिभ्योनम:नरवेषु गंधर्वेभ्यो॰ओष्ठयो:
कार्तिकेयाय गणेशायकटिपार्श्वयो: इतिदेवयोनिन्यास: मत्स्यायनम:मूर्द्धनि कूर्माय॰पादयो: नृसिंहायनम:ललाटे वाराहायन
म:जंघयो: वामनायनम:मुखे परशुरामायहृदि रामायबाहुषु कृष्णायनाभ्यां बुद्धायबुद्धौ कल्किनेजान्वो: केशवायनम:शिरसि
नारायणायमुखे माधवाय॰ग्रीवायाम् गोविंदायनम:बाह्वो: विष्णवेनम:हृदये मधुसूदनायनम:पृष्ठे त्रिविक्रमाय॰कट्यां वाम
नायनम:जठरे श्रीधरहृषीकेशाभ्यां॰जंघयो: पद्मनाभायनम:गुल्फयो: दामोदरायनम:पादयो: इतिमूर्तिन्यास: अश्वमेधा-
यनम:मूर्ध्नि नरमेधायनम:ललाटे राजसूयायनम:मुखे गोसवायनम:कंठे द्वादशाहायनम:हृदि आधीनेभ्योनम:नाभौ सर्व
जितेभ्योनम: दक्षिणकट्यां सर्वमेधाय॰वामकट्यां अग्निष्टोमायलिंगे अतिरात्रायनम:वृषणयो: आप्तोर्यामायऊर्वो: षोडशिनेजा-
न्वो: उतथ्याय॰ दक्षिणजंघायां वाजपेयायनम:वामजंघायां अत्यग्निष्टोमायदक्षिणबाहौ चातुर्मास्यायनम:वामबाहौ सौत्राम-
णये॰ हस्तेषु पश्विष्टिभ्योनम:अंगुलीषु दर्शपौर्णमासाभ्यां॰नेत्रयो: सर्वेष्टिभ्यो॰रोमकूपेषु स्वाहाकारायवषट्कारायनम:स्तन
यो: पंचमहायज्ञेभ्य:पादांगुलीषु आहवनीयायमुखे दक्षिणाग्नयेहृदये गार्हपत्यायनाभौ वेदीउदरे प्रवर्ग्यायमूषणेषु सवने-
भ्य:पादयो: इध्माभ्यां॰बाहुषु दर्भेभ्योनम:केशेषु इतिक्रतुन्यास: अथमूलन्यास: आयुधन्यास: शक्तिन्यास: अंगन्यास: इ
तिसाधारणा:सर्वत्र वैष्णवमधीकृत्यउच्यते धर्मायमूर्ध्नि ज्ञानायहृदि वैराग्यायगुह्ये ऐश्वर्यायपादयो: खड्गायशिरसि शार्ङ्गि

यमस्तके मुशलायदक्षिणभुजे हलायवामभुजे चक्रायनाभ्यां जठरे पृष्ठेच शंखायलिंगेवृषणेच गदायैजंघयोर्जान्वोश्च पद्माय
गुल्फयोः पादयोः वज्रायशक्तये दंडायखड्गायपाशाय ध्वजाय अंकुशायत्रिशूलायपद्मायेतिशिवेइत्यायुधन्यासः लक्ष्म्यैनमोललाटे सरस्वत्यैनमोमुखे रत्यैनमोगुह्ये प्रीत्यैनमःकंठे कीर्त्यैनमोदिक्षु शांत्यैनमोहृदि तुष्ट्यैनमोजठरे पुष्ट्यैनमःसर्वत्र इतिशक्तिन्यासः अथमूलमंत्रन्यासः हृदयहृदये शिरःशिरसि शिखाशिखायां कवचंसर्वत्र नेत्रयोर्नेत्रे करयोरस्त्रं दक्षिणवामस्तनयोः
श्रीवत्सायनमः उरसिकौस्तुभाय कंठेवनमालायै इत्यंगन्यासः ओंपादयोः नंजान्वोः मोंगुह्ये भंनाभौ गंहृदये वंकंठे तेंमुखे
वांनेत्रयोः सुंभाले देंमूर्ध्नि वांदक्षिणपार्श्वे यंउत्तरपार्श्वे इतिद्वादशाक्षरन्यासः अथप्रतिमायांजीवन्यासः तत्रतेजोभावयि-
त्वा बुद्धींद्रियकर्मेंद्रियमनःप्राणपंचकाहंकारशब्दतन्मात्रादिकंसर्वसंयोज्य पुरुषभावंसंभावयित्वा सर्वसाक्षिणंभावयित्वा तत्र
तत्त्वन्यसेत् तद्यथा आत्मतत्वायनमः आत्मतत्वाधिपतयेब्रह्मणेनमःपादयोः विद्यातत्वाय० विद्यातत्वाधिपतयेविष्णवेनमः
हृदये शिवतत्वाय० शिवतत्वाधिपतयेरुद्रायनमःशिरसि अथगायत्रीन्यासः सूर्यस्यतत्पादांगुष्ठयोः संगुल्फयोः विंजंघयोः
तुंजान्वोः वंऊर्वोः रेंगुदे णिंवृषणे यंकटौ भंनाभौ गंजठरे देंस्तनयोः वंहृदि स्यंकंठे धींवक्त्रे मंतालुदेशे हिंनासिकाग्रे धिंचक्षु-
षोः योंभ्रूमध्ये योंललाटे नःपूर्वे प्रंदक्षिणे चोंपश्चिमे दंउत्तरे यांमूर्ध्नि त्संसर्वत्र तत्सवितुर्हृदि वरेण्यंशिरसि भर्गोदेवस्यधीमहिकव-
चे धियोयोनःनेत्रयोः प्रचोदयादस्त्रे इतिगायत्रीन्यासः अथमंत्रन्यासः अग्निमीळेपादयोः इषेत्वेतिगुल्फयोः शंनोदेवीतिजा

न्वोः बृहद्रथंतरेतिऊर्वोः स्वस्तिनःजठरे दीर्घायुत्वायहृदये श्रीवश्चतेतिकंठे त्रातारमितिवक्त्रे त्र्यंबकमितिस्तनयोः नेत्रयोः मूर्धानमि
तिमूर्ध्नि अथद्वादशाक्षरनारायणस्यमूर्तिन्यासः ओंकेशवायइतिशिरसि नंनारायणायेतिमुखे मोंमाधवायेतिग्रीवायां भंगोविं
दायेतिकंठे गंविष्णवेइतिपृष्ठे वंमधुसूदनायकुक्षौ तेंत्रिविक्रमायकट्यां वांवामनायनमः जंघयोः स्रंश्रीधरायगुल्फे देंहृषीकेशायद
क्षिणगुल्फे वांपद्मनाभायवामपादे यंदामोदरायदक्षिणे अंहुंहृदयायनमःहृदये ओंविष्णवेनमःशिरसि ब्रह्मणेशिखायां ध्रुवाय
कवचे चक्रिणेनेत्रयोः चक्रिणेनमःअस्त्रायफट् अस्त्रंहस्तयोः नमःशंभवेइतिगायत्र्यैदक्षिणनेत्रे विजयायनमःसावित्र्यैवामनेत्रे
चक्रिणेचक्ररूपायपिंगलाक्षंसर्वदिक्षु इत्यष्टांगविष्णुमंत्रन्यासः सहस्रशीर्षेतिपादयोः पुरुषएवेतिजंघयोः एतावानस्येतिजान्वोः
त्रिपादूर्ध्वमित्यूर्वोः तस्माद्विराडितिवृषणे तस्माद्यज्ञादितिकट्यां तस्माद्यज्ञात्सर्वहुतइतिनाभ्यां तस्मादश्वाइतिहृदि तंयज्ञमिति-
स्तनयोः यत्पुरुषमितिबाह्वोः ब्राह्मणोस्येतिमुखे चंद्रमामनसश्चक्षुषोः नाभ्याआसीदितिकर्णयोः यत्पुरुषेणेतिभ्रुवोः सप्तास्येति-
भाले यज्ञेनयज्ञमितिशिरसि अद्भ्यःसंभृतइतिहृदये वेदाहमितिशिरसि प्रजापतिःशिखायां योदेवेभ्यःकवचे रुचंब्राह्मेतिनेत्र
योः श्रीश्चतेत्यस्त्रं इतिपुरुषसूक्तन्यासः अथशिवस्यपंचब्रह्मन्यासः अंगुष्ठयोरीशानं तर्जन्योस्तत्पुरुषम् मध्यमयोरघोरं अनामि
कयोर्वामदेवं कनिष्ठिकयोःसद्योजातं ततःकनिष्ठिकयोर्हृदयं अनामिकयोःशिरः मध्यमयोःशिखा तर्जन्योःकवचं अंगुष्ठयोरस्त्रं
विन्यस्यपरेणतेजसासंयोज्य कवचेनावगुंठ्य सर्वकर्मस्वनियोजयेत आचमनंसर्वत्र इत्यंदेवस्यकरंन्यासंकृत्वा लिंगमुद्रांबध्वा

ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवोमे अस्तु सदाशिवोम् इतिमंत्रेणेशानमुद्दिश्य-
भीयात् ततः अंगुल्यग्रेरु इमूर्त्तयेमूर्ध्नि तत्पुरुषायविद्महे महादेवायधीमहि तन्नोरुद्रः प्रचोदयात् इतितर्जन्यंगुष्ठयोरेवं गात्रम्
तत्पुरुषमुरवे अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्योनमस्तेअस्तु रुद्ररूपेभ्यः इतिमध्यमांगुष्ठयोगेनत्दक्ष-
घोरम् वामदेवायनमोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालायनमः कलविकरणायनमो बलविकरणायनमो बलायनमोबल
प्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमः इत्यंगुष्ठानामिकयोगेनगुह्ये सद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः भ
वेभवेनातिभवेभवस्वमांभवोद्भवायनम इति कनिष्ठिकांगुष्ठयोगेनपादादारभ्यमस्तकांतम् यावन्मूर्तिव्यापकत्वेनब्रह्मन्यसेत्
ततः ईशानः सर्वविद्यानांनमइति शशिनमुपरितनमूर्ध्नि ईश्वरः सर्वविद्यानामिति कल्पितंचंद्रोभयदलं पूर्वमूर्ध्नि ब्रह्माधिपतिर्ब्रह्म
णोधिपतिरितित्दष्टांदक्षिणमूर्ध्नि शिवोमेअस्तुनमइतिमरीच्यामुत्तरमूर्ध्नि सदाशिवोंनमइतिज्वालिनीप्रश्चिममूर्ध्नि तत्पुरुषा
यविद्महेनमइति पूर्ववक्त्रेशांतिं महादेवायधीमहीतिदक्षिणवक्त्रेविद्यां तन्नोरुद्र इत्युत्तरवक्त्रे प्रतिष्ठां प्रचोदयादितिपश्चिमवक्त्रे
धृतिं इतितत्पुरुषस्यकलाचतुष्टयन्यासः ततोअघोरेभ्योनमइतितमांसुरसि अथघोरेभ्योमोहायैनमइतिग्रीवायाम् घोरेभ्योक्षमा-
येइतिस्कंधयोः घोरतरेभ्योनिद्रायैनमइतिनाभौ सर्वेभ्यः सर्वव्याध्यैनमइतिकुक्षौ सर्वशर्वेभ्यः मृत्यवेनमइतिपृष्ठे नमस्तेअस्तु
धायैनमइतिवक्षसि रुद्ररूपेभ्यः तृषायैनमइतिउरसि इत्यष्टावघोरकलान्यासः वामदेवानमइतिरजांगुदे ज्येष्ठायैनमइतिरक्षा-

लिंगे श्रेष्ठायनमइतिरतिंदक्षिणोरौ रुद्रायनमइतिकामांवामोरौ कालाय॰दक्षिणजानौ कलविकरणायनमइतिसंजीविन्येवा-
मजानौ बलविकरणायक्रियायैदक्षिणजंघायां बलायनमोवृत्यैवामजंघायां बलविकरणायन॰छायायैदक्षिणस्फिचि बलप्रम-
थनायधात्रींवामस्फिचि सर्वभूतदमनायनमइतिब्रह्माणींकट्यां मनसेनमइतिशोषिणींदक्षिणपार्श्वे उन्मनायनमइतिवामपार्श्वे
इतित्रयोदशकलान्यासः सद्योजातंप्रपद्यामिन मइतिसिद्धिंदक्षिणपादे सद्योजातायनमइतिऋद्धिंवामपादे भवेनमइतिजयांदक्षि-
णपाणौ अभवेनमइतिलक्ष्मींवामपाणौ नातिभवेमेधांनासायां भवस्वमांनमइतिकांतिंशिरसि भवायनमइतिस्वधांदक्षिणबाहौ
उद्भवायनमइतिप्रभांवामबाहौ इतिसद्योजाताष्टकम् ततस्तमाद्याःसर्वाःकला अत्रविंशतिविंतिकलांतरन्यासभावनांकृत्वामुद्राःप्रद-
र्शयेत् विद्यादेवंहंसंसंपाद्य हंसहंसेतित्हृदयादिन्यासंकुर्यात् अथनृसिंहे नृसिंहउग्ररूपज्वलज्वलप्रज्वलस्वाहा इतिमंत्रः
नारसिंहोयदास्याप्यस्त्वधिवास्यनिशागमे कृत्रिमंवाथसाक्षाद्वापशुंदत्वाबलिंहरेत् इतिन्यासंकृत्वा परमेष्ठिनंनमस्कृत्यनि-
द्रामावाहयाम्यहं मोहिनींसर्वभूतानांमनोविभ्रमकारिणीम् विरूपाक्षेशिवेशांतिआगच्छत्वंतुमोहिनी वासुदेवहितेकृष्णेकृ-
ष्णांबरविभूषिते आगच्छसहसाजस्त्वंकृतसंसारमोहिनी कृशुप्स्वसंहरेदेविकुमार्यकांतमानसे श्रमेनिश्वासबाह्येवेआगच्छशु
वनेश्वरि नमःसत्वरजोपेतेआगच्छवरवर्णिनि मनोबुद्धिरहंकारसंहारस्त्वंसरस्वति शब्दःस्पर्शश्चरूपंचरसोगंधश्चपंचमः

आगच्छगृण्हसंक्षिप्यमोहपाशनिबंधिनि भवस्योत्पत्तिहेतुस्त्वंयावदाभूतसंप्लवम् भुवःकल्पांतसंध्यायांवससेत्वंचराचरे भोगि

शय्याप्रसुप्तस्यवासुदेवस्यशासने त्वंभूतिष्ठासिवेदेविमुनियोनिसमुत्थिते पितृदेवमनुष्याणांसयक्षोरगरक्षसाम् पशुपक्षिमृगा
णांचयोगमायाविवर्द्धिनी वससेसर्वतीर्थेषुमातर्वहितकारिणी एहिसावित्रिमूर्तित्वंचक्षुर्षास्थानगोचरे विशनासापुटेदेविकंठेनो
त्कंठिताविश प्रतिभावयमांसर्वमातृत्वंदेविसुंदरि इदमर्घ्यमयादत्तंपूजेयंप्रतिगृह्यतां उपप्रागात्परमितितस्याःपूजाविधिःस्मृतः नि
द्राकलशेतिनिद्रांपूजयित्वा लोकपालक्षेत्रपालभूतेभ्योबलिंदत्वा स्थाप्यदेवशय्यांतःप्राच्यांसर्वतोभद्रेपूजयेत् विष्णुश्चेद्वादशा
रेचक्रमध्ये ऽष्टदलेपद्मे मूलमंत्रेणदेवंनिवेशयेत् ओं हृद्दयायनमः इतिकर्णिकायांहृदयंपूजयेत् विष्णवेनमइतिशिरः पूर्वपत्रे अ
सुरघ्नेनमइतिशिखां दक्षिणे भवायनमइतिकवचंपश्चिमे चक्रिणेनमइतिफट् अस्त्रमुत्तरे शंभवेनमइतिगायत्रीमाग्नेयदले विजया
यनमइतिसावित्रीमीशानदले ज्योतीरूपायनमोनैर्ऋते चक्रिरूपायनमइतिपिंगलाख्यंवायव्ये इतिगर्भावरणम् आरासुपूर्वा
दिक्रमेण केशवनारायणमाधवगोविंदविष्णुमधुसूदनत्रिविक्रमश्रीधरहृषीकेशपद्मनाभदामोदराइतिद्वादशमूर्त्तीःपूजयेत्
इतिद्वितीयावरणं प्रागादितः खड्गायनमः गदायैनमः चक्रायनमः शंखायनमः पद्मायनमः हलायनमः शार्ङ्गायनमः अग्निमू
र्त्यधिपतयेनमः यजमानमूर्त्तयेनमः यजमानमूर्त्यधिपतयेनमः उग्रायनमः अर्कमूर्त्तयेनमः इतितृतीयावरणम् अथमूर्तिपाः
पृथिवीमूर्तयेनमः पृथिवीमूर्त्यधिपतयेशर्वाय अर्कमूर्तये अर्कमूर्त्यधिपतयेरुद्राय जलमूर्तये जलमूर्त्यधिपतयेभवाय वायुमूर्तये वायुमूर्त्यधिपतये
ईशानाय इंदुमूर्तये इंदुमूर्त्यधिपतयेमहादेवाय खमूर्तये खमूर्त्यधिपतयेभीमाय इत्यष्टौमूर्त्तीःतदधिपांश्चार्चयेत् वैष्णवंचेत्तदा पूर्वे पृथ्वीमूर्तये

वा॰ १२ म॰

पृथ्वीमूर्त्यधिपतयेवासुदेवायनमः दक्षिणे जलमूर्तयेनमः जलमूर्त्यधिपतयेसंकर्षणायनमः पश्चिमे अग्निमूर्तयेनमः अग्निमू
र्त्यधिपतयेप्रद्युम्नायनमः उत्तरे वायुमूर्तयेनमः वायुमूर्त्यधिपतये अनिरुद्धायनमः मध्ये खमूर्तयेनमः खमूर्त्यधिपतयेनारायणाय॰
इति शैवमूर्तिपंचपक्षे ब्रह्मविष्णुरुद्रेश्वरसदाशिवाएवमूर्तिपाः इंद्रादयस्तुसर्वत्रपूजनीयाः ततःआचार्यः क्रमेणपलाशोदुंबरा
श्वत्थापामार्गसमिधांप्रत्येकंद्वादशसहस्रंषट्त्रीण्यष्टसहस्रमष्टशतंवाहिरण्यगर्भइतिकुंडसमीपेसंस्थाप्य शांतिकपौष्टिकेमंत्रैर्यथा
विभागंऋत्विजोजुहुयुः प्रतिकुंडमेकैकाऋत्विक्मूर्तिपास्तत्तन्मंत्रेणपूज्यंते शंनोवातःशंनइंद्राग्नी शंनोदेवीतिशांतिकमंत्राः पुष्टिर्न
रण्वा गयस्फानः त्र्यंबकमितिपौष्टिकाः ततोमूर्त्योःपूर्वकुंडेपलाशसमिधामष्टसहस्रमष्टशतंवातिलैर्वाअग्निमीळेतिजुहुयुः इषेत्वे-
तिदक्षिणे अग्नआयाहीतिपश्चिमे शंनोदेवीत्युत्तरे यदाअष्टौकुंडानितदावैषट्इतिषट्आग्नेये दशप्रणवाषडायत्रीवाऽस्मिन्नैर्ऋते जा
तवेदसइतिवायव्ये नमोब्रह्मणेइतिईशानकुंडे मूर्धानंदिवइतिपूर्णाहुतिंजुहुयुः आहुतिसंपाताशांतिकलशेकुंडसमीपेपातयेयुः तन
तोमूर्तिपलोकपालेभ्यः समिद्भिःघृतेनतिलैर्वाऽष्टसहस्रमष्टशतंवाजुहुयात् तेषांमंत्रास्तु स्योनापृथिवीतिपृथिवीमूर्तेः अघोरेभ्योमू
र्तिपतेःसर्वस्य इंद्रायेंदोइतिइंद्रस्य अग्निंदूतमित्यग्नेः पशूनामित्यग्निमूर्तिपतेःपशुपतेः अग्नआयाहीत्यग्नेः असिहविरित्यजमा
नमूर्तेः तमिंद्रंजोहवीमीतियजमानमूर्तिपतयेरुद्रस्य यमायसोममितियमस्य उदुत्यमितिसूर्यमूर्तेः आवोराजानमितिसूर्यमूर्तिपतयेरुद्रस्य
— असुन्वंतमितिनिर्ऋतेः आपोहिष्ठेतिजलमूर्तेः विश्रूषमितिजलमूर्तिपतयेभवस्य इमंमेइतिवरुणस्य वातआवात्विवितिवायुमूर्तेः

१२

तमीशानमितिवायुमूर्तिपतयेईशानस्य आनोनियुद्भिरितिवायोः वयंसोमेतिसोमसूर्ययोः इदंमंशुक्रेतिसोममूर्तिपतयेमहादेव-
स्य आदित्यलस्येतिरवमूर्त्तेः मृगोनभीमइतिरवमूर्तिपतयेभीमस्य अभित्यंदेवंसवितारमितीशानस्य ततोऽष्टसहस्राष्टशतान्यत
मसंख्ययामहाव्याहृतिभिस्तिलयवव्रीहिचर्वाज्यैः क्रमेणप्रत्येकंजुहुयुः ततोगुरुःस्थाप्यलिंगकेनमंत्रेणघृतेनतिलैर्वाऽष्टसहस्रम-
घृशतंवाहुत्वापूर्णाहुतिंहुत्वा देवस्यदक्षिणेकर्णेहोमंनिवेद्य पूर्वकुंडेघृताहुत्यष्टकंमूलमंत्रेणहुत्वादेवपादौस्पृशेत् मूलमंत्रेणपूर्वो
क्तसंख्ययायाम्यकुंडेहस्तेनदधिहुत्वा देवनाभिंवारुणकुंडेक्षीरंहुत्वाहृदिस्पृशेत् सौम्यकुंडेमध्वाहुती हुत्वामूर्द्धानंस्पृशेत् वारु-
णकुंडेमिश्रंघृतादिचतुष्टयंहुत्वातेनैवपूर्णाहुतिंहुत्वा देवंसर्वांगंस्पृशेत् ततःकूर्मशिलांब्रह्मशिलांपिंडिकांवाहनानिपरिवारकदे-
वांश्चवैदिकैर्नाममंत्रैर्वासंपूज्य मुख्यप्रतिमायावामेऽधिवासयेत् तानिमधुघृतेनाभ्यज्य प्रक्षाल्यसंपूज्यवस्त्रेणाच्छाद्य प्रधानप्रति-
मापिंडिकायाःस्वमंत्रन्यासंकुर्यात् तत्रविष्णुश्चेत्स्थाप्यस्तदा ओंयंठंवंपंभंफंलक्ष्म्यैनमः एतानिपंचाक्षराणिदृक्छिरः शिखाक
वचनेत्रसंज्ञकानिहुंफडितिवचनसमुदाय इतिपिंडिकायांपंचांगानिन्यस्य तत्त्वत्रयमूर्तिपांश्चपूर्ववद्विन्यसेत् तदा ॐ ह्रींश्रींह्रांसःपर-
ब्रह्मणसर्वाधारायनमः ओंह्रांश्रींह्रीं दिव्यतेजोधारिण्यैस्कंभगायेन्नमः इतिमंत्राभ्यामधिवासयेत् इत्यधिवासनम् प्रासादोपिचेच्चू
तनरत्नस्याप्यधिवासनं तत्रप्रासादाग्रेएकाशीतिपदमंडलमक्षतैःकृत्वा तेषुपदेषुसप्तधान्यपुंजान्कृत्वा जलपूर्णानेकाशीतिकुंभा-
नाहृत्य तत्रनवनवकोकानांमध्येमध्यमंकोष्ठंज्ञात्वातेषुकुंभान्मध्यपूर्वादिक्रमेणन्यस्य मध्यकुंभे शम्युदुंबराश्वत्थचंपकाशोकप-

लाशाप्लक्षणान्यग्रोधकदंबाम्रबिल्वार्जुनवृक्षसंभवं पल्लवद्वादशकं सोमायवनस्पत्यंतर्गतायनमइतिनिक्षिपेत् ततः पद्मकरोचनादूर्वांकुर
दर्भपिंजूलश्वेतपीतसर्षपसितरक्तचंदनजातीकुसुमनंद्यावर्त्तमितिदशकंपूर्वे यवव्रीहितिलस्वर्णरजतसमुद्रगामिनीकूलमृत्तिका-
भूम्यसंस्पृष्टगोमयमितिसप्तकमाग्नेये सहदेवीविष्णुक्रांताभृंगराजमहौषधीशमीशतावरीगुडूचीश्यामाकमित्यष्टकंयाम्ये कदली-
पूगफलनारिकेलबिल्वनारिंगमातुलिंगबदरामलकमितिफलाष्टकंनैर्ऋते मंत्रसाधितंपंचगव्यंवारुणे शम्युदुंबराश्वत्थन्यग्रोधपला-
शकषायपंचकंवायव्ये शंखपुष्पीसहदेवीबलाशतावरीकुमारीगुडूचीवचाव्याघ्रीतिमूलाष्टकंसौम्ये वल्मीकादिसप्तमृत्तिकाई-
शानकुंभेनिधाय हिरण्यवर्णामितिमध्यकुंभान भिमंत्र्यशेषान्गंधोदकेनपूरयित्वा मूलमंत्रेणाभिमंत्र्य सूत्रेणावेष्ट्यांतर्बहिरध-
स्तादूर्ध्वंच प्रासादंपंचगव्येनसंप्रोक्ष्य मूर्धानंदिवइतिवल्मीकमृदाविलिप्य समुद्रज्येष्ठाइतीशानदिक्स्थेनमृत्तिकाकुंभेनस्नपयेत्
यज्ञायज्ञेतिवायव्येनकषायकुंभेन पयःपृथिव्यामितिवारुणेनपंचगव्यकुंभेन याःफलिनीरितिनैर्ऋतेनफलकुंभेन हंसःशुचिष
दितिसौम्यस्थमूलकुंभेन विष्णोरराटेतिपूर्वकुंभेन सोमंराजानमितिवन्हिस्थकुंभेन विश्वतश्चक्षुरितियाम्यकुंभेन नमोस्तुसर्पे-
भ्यइतिमध्यकुंभेन इदमापःप्रवहतेत्यष्टाभिःपूर्वादिक्रमेणप्रासादंसशिखं स्नपयेत् एकाशीतिकुंभासंभवेतुगंधोदकपूरितेनैके
नकलशेन देव्यायकर्मणेशुंधध्वमितिसंप्रोक्ष्य सूत्रेणावेष्ट्यस्नापयित्वा देवरूपंप्रासादंचिंतयित्वा पताकादिनाशोभयित्वा गंधादि
नापूजयित्वा तस्याप्यध स्तादेवसंचिंत्य मंत्रेणप्रासादमधिवासयेत् तद्यथा ओंन्हींसर्वदेवमयाचिंत्यसर्वरत्नोज्ज्वलाकृते यावच्चंद्र

श्चसूर्यश्चतावदत्रस्थिरोभवेत्यधिवास्य पिंडिकावाहनपरिवारदेवतानांतत्तन्मंत्रैः प्रत्येकमष्टाविंशतिसंख्याकंहोमंतिलैः कृत्वा
मूलमंत्रेणचर्वष्टोत्तरशतंहुत्वाचतस्त्रोगाः विष्णुगायत्र्यादुग्धाक्षीरेणविष्णुगायत्र्याचरुंश्रपयित्वा देवायनिवेद्य द्वादशब्राह्मणान्भो
जयित्वा विष्णुःप्रीयतामितिनिवेदयेत् ततः आचार्यायधेनुंदद्यात् रात्रौजागरणंकुर्यात् इतिप्रासादाधिवासनम् अत्रज्येष्ठक
निष्ठानांप्रतिमानांसप्तरात्रंपंचरात्रंत्रिरात्रमेकरात्रंसद्योवाबल्यंतमधिवासयेत्इतिपद्धतिकारः अत्रश्लोकाः अनेकदिननिर्वर्त्येत्व
धिवासनकर्मणि होमानष्टौसहस्त्राणिविदधीरन्पृथक्पृथक् तस्मिन्नेकाहनिर्वर्त्यंकुर्यादष्टोत्तरंशतम् प्रागवत्पूर्णाहुतिंदत्वासकु
ज्जपंतिद्वारपाः यद्वाप्रतिदिनंहोममष्टोत्तरशतंशतं देशिकोमूर्तिपैःकुर्यात्यावत्कार्यंसमाप्यते संध्यास्वतिसृषुबलिंमंत्रैर्दद्या-
द्यथोदितैः आचार्यदक्षिणादेयाऋत्विग्भ्यश्चस्वशक्तितः भोजनंचतथान्येभ्योदेयंवित्तानुसारतः विनाधिवासनंयज्ञःकृतोपिनफ
लप्रदइति ततोगुरुर्बहिर्निर्गत्यप्रासादाभिमुखोभूत्वादेवरूपंध्यायेत् पादोपादशिलास्तस्यजंघापादोर्ध्वमुच्यते गर्भश्चैवोदरंज्ञेयंकटि
श्चकटिमेखला स्तंभाश्चबाहवोज्ञेयाघंटाजिह्वाप्रकीर्तिता दीपःप्राणोस्यविज्ञेयो त्वपानोजलनिर्गमः ब्रह्मस्थानंयदेतच्चतन्नाभिःपरिकी-
र्तितः हृत्सर्वंपिंडिकाज्ञेयाप्रतिमापुरुषःस्मृतः पादचारस्त्वहंकारोज्योतिस्तच्चक्षुरेवच तदूर्ध्वंप्रकृतिस्तस्यप्रतिमात्मास्मृतोबुधैः नल-
कुंभादधोद्वारंतस्यप्रजननंस्मृतं शुकनासाभवेन्नासागवाक्षःकर्णउच्यते कपोतपालिःस्कंधोस्यग्रीवाचामलसारकः कलशस्तुशिरो-
ज्ञेयंमज्जाक्षिमरसांहितत् मेदश्चैवसुधांविद्यात्प्रलेपोमांसउच्यते अस्थीनिचशिलास्तस्यस्नायुःकीलादयःस्मृताः चक्षुषीशिखरा

स्तस्यध्वजाः केशाःप्रकीर्तिताः एवंपुरुषरूपंतंध्यात्वाचमनसासुधीः प्रासादंपूजयेत्पश्चाद्गंधपुष्पादिभिःशुभैः सूत्रेणवेष्टयेद्देवंवाससा
त्परिकल्पयेत् प्रासादमेवमभ्यर्च्यवाहनंचाग्रमंडपइति ततःकुंडवास्तोष्पतेईशमंत्रेणाष्टोत्तरशतंहुत्वादेवमंत्रेणचहुत्वा पूर्णाहुत्यंतंस
र्वंकृत्वा दिग्बलिंदत्वाआत्मानंनिवेद्यप्रणमेत् यत्रतुस्वयंभूर्देवः प्रागेव वाप्रतिष्ठितः प्रासादश्चेन्नूतनस्तत्रापितदुत्तरे मंडपंकृत्वा पूर्वेद्युः
पुण्याहवाचनंनांदीश्राद्धंदेवप्रतिष्ठोक्तं मंडपस्थापनंऋत्विग्वरणादिकंकुर्यात् तत्रगुरुर्वेद्यांतद्देवतामंडलंकृत्वावास्तुदेवतापूजनाग्निप्रति
ष्ठागृहपूजाज्यभागोत्तरग्रहहोमशिखादिवास्तुपीठदेवताः वास्तुदेवहोमंकाशीतिकलशस्थापनानि कृत्वा तैःप्रासादंक्षालयित्वा य
जमानमभिषिंच्यप्रासादमुत्सृजेदेतावानेवविधिः अथमंडपादुत्तरतः पूर्वकल्पितैः शांतिकलशादिजलैःसपरिकरं यजमानमभिषिंचेयुः
ततः आचार्यमूर्तिपब्राह्मणस्थपत्यादीन्परितोष्य प्रासादोत्सर्गंकुर्यात् तत्रमासपक्षाद्युल्लिख्य इमंशिलेष्टकादारुादिनिर्मितंकलशध्वजग
तीप्राकारपरि वारगोपुरपरिवारदेवतालयसंयुतंतत्तद्देवतालोककामः कुलद्वयानुग्रहायामुकदेवताप्रीतयेऽहमुत्सृजामीतिकुशयवजलानि-
क्षिप्त्वा देवंनत्वाब्राह्मणान्भोजयेदिति ततःप्रातः आचार्योमूर्तिमूर्तिपतिलोकपालमंत्रैश्चप्रतिदैवतमष्टशतमष्टाविंशतिंवापूर्णाहुत्यंतं
स्वकुंडेहुत्वाधिवासितांकूर्मशिलांब्रह्मशिलांपिंडिकांचत्रातारमितिगृहीत्वाविप्राभावार्थं पुष्पोदकधारयाअस्त्रमंत्रेण शतातीयेनवा
प्रासादमभ्युक्ष्य महांइंद्रोणेतिदर्भेणोल्लिख्यास्त्रपूतेनजलेनपुनःप्रोक्ष्यप्रासादस्यद्वारस्य मध्याद्यवेनयवार्धेनवंशाग्नौउत्तरावाग्नि
त्यस्नानादिसंस्कृतांकूर्मशिलांप्रणवेनपंचरत्नोपरिनिधाय तच्छुभ्रेसौवर्णकूर्मंद्वारसंमुखंनिधाय तदुपरिरत्नानिनिधाय षट्त्रिं

शाङ्गर्वयुक्तां पंचचत्वारिंशद्रूतंतुनांवाब्रह्मशिलामधिवासितांनिदध्यात् औंनमोव्यापिनिस्थिरे अचलेध्रुवे औंश्रीलस्वाहेतिमं
त्रेणयथाशक्तिसंपूज्यप्रार्थयेत् त्वमेवपरमाशक्तिस्त्वमेवासनधारिका शिवाज्ञयात्वयादेविस्थातव्यमिहसर्वदेति ततोवर्णाध्व
नेनमः पदाध्वनेनमः मंत्राध्वनेनमः भुवनाध्वनेनमः तत्वाध्वनेनमः सकलाध्वनेनमः इतिसकलमध्वानंतदारूढंध्यायेत् ततः
पुण्याहवाचनंकृत्वा मूलमंत्रेणाष्टोत्तरशतंहुत्वा षट्त्रिंशत्कपंचचत्वारिंशत्कवाब्रह्मशिलागर्तेषुप्रादक्षिण्येनसदेम्याहस्तेनरत्न-
न्यासंकुर्यात् श्वभ्ररहितेब्रह्मशिलोपरिभागेसश्वभ्रापिंडिकांपूर्वपश्चिमाननेप्रासादेसौम्यप्रणालींदक्षिणोत्तराननेपूर्वप्रणालीम्भुन
वसूक्तेननिधायदेवपत्नीलिंगकेनमंत्रेणपिंडिकामभिमंत्र्य तत्रविष्णोःस्थापनायांश्रीश्चते॰ रुद्रस्यगौरीर्मिमाय॰ सूर्यस्योषस्त्वाद्वि
त्रमित्यादिना ततआत्मतत्वायनमः आत्मतत्वाधिपतयेक्रियाशक्त्यैनमः विद्यातत्वाय॰ विद्यातत्वाधिपतयेज्ञानशक्त्यैनमः शिवात
त्वायनमः शिवातत्वाधिपतयेइच्छाशक्त्यैनमः इतितत्वन्यासः प्रतितत्वंमूर्तिमूर्तिपतिलोकपालान्विन्यसेत् ततः आधारश-
क्त्यैनमः इतिन्यस्यानंतासनादिवह्नितत्वांतंपीठपूजांनिर्वर्त्य आसनशक्तिभ्यांनमइत्युक्त्वाभ्यर्च्य सर्वदेवमयीशानित्रैलोक्यालय
द्काशिणि त्वांप्रतिष्ठापयाम्यत्रमंदिरेविश्वनिर्मिते यावच्चंद्रश्चसूर्यश्चयावदेषावसुंधरा तावत्त्वंदेवदेवेशिमंदिरेऽस्मिन्स्थिराभवेतितां
प्रार्थ्य प्रणवंश्वभ्रे बाह्येषोडशस्वरान् तेषांपरितोव्यंजनानिन्यस्य श्वभ्रांतःरत्नादीन्विन्यसेत् यथाबाह्यपरिधौयवव्रीहिनिष्पा
वप्रियंगुतिलमाषनीवारशालिसिद्धार्थकान् वज्रमौक्तिकवैडूर्यशंखस्फटिकपुष्परागचंद्रकांतेंद्रनीलपद्मरागान् मनःशिलाहरिता

सौवर्णरौप्यताम्रआयसत्रपुसीसकांस्यास्फूटतीक्ष्णलोहानि श्वेतरक्तचंद
नांजनश्यामांजनकासीससौराष्ट्रीरोचनागैरिकपारदान् सौवर्णरौप्य
नामरुअर्जुनोशीर वैष्णवीसहदेवीलक्ष्मणाचेति तत्रबीजानामभावेयवान् रत्नानामभावेवज्रं धातूनामभावेहरितालंतामाद्यभावेकुष
र्पं ओषधीनामभावेसहदेवींन्यसेदिति एवंन्यस्तानांरत्नानांदिक्पालमंत्रैरालंभनंकृत्वा पृथ्वीमेरुकूर्मवाहनानिसौवर्णानिद्वारोन्मुखा
नि पारदंचतस्मिन्मध्यश्वभ्रेनिधाय गुग्गुलरसेनरत्नादिकंस्थिरीकृत्य मधुपायसेनश्वभ्रमनुलिप्य वस्त्रेणाच्छादयकवचेनावगुंठ्यास्त्रमंत्रे
णसंरक्ष्य गृह्यवैप्रतिष्ठेतिप्रासादमभिषिंच्य इंद्रादिभ्योबलिंदत्वाचामेत् एवंपिंडिकांप्रतिष्ठाप्य प्रासादाद्बहिरष्टदिक्षुस्थंडिलानिसंपा
द्यसंस्कृत्यतत्तत्स्थंडिलानामीशानभागेषुकलशान्मंत्रवद्विन्यस्याऽग्निंप्रणीय प्रतिस्थंडिलंपलाशसमिधामष्टोत्तरसहस्रमष्टशतंवामूलमं
त्रेणहुत्वाज्येनच नारायणायविद्महेवासुदेवायधीमहि तन्नोविष्णुःप्रचोदयादितिमंत्रेणाष्टोत्तरशतमष्टाविंशत्यष्टौवाहुत्वाचार्योऽष्टदिक्
संस्थेभ्यःकुंभेभ्यःपात्रेतोयमादाय मूलमंत्रेणशतकृत्वोभिमंत्र्यप्रतिमासन्निधौगत्वा सर्वतीर्थमयमिदंजलमितिध्यायन्देवमूर्ध्न्यभिषिंचेत्
नरसिंहेनहुंफडंतेनदेवस्यादिग्बंधनंकृत्वामूर्तिपैःसहदेवंप्रार्थयेत् प्रबुध्यस्वमहाभागदेवदेवजगत्पते मेघश्यामगदापाणेप्रबुद्धकमलेक्ष
ण प्रबुद्धस्वधरानंतवासुदेवनमोस्तुतेइति जलक्षीरकुशाग्रतिलतंदुलयवसिद्धार्थकपुष्पाणिशंखेकृत्वा शंखमुद्धृत्यादेवायार्घ्यंदत्वा उत्ति
ष्ठब्रह्मणस्पत इत्युत्थाप्यरथमुपवेश्य देवस्यपुरतोगुरुःपृष्ठतोयजमानःपार्श्वतोमूर्तिपाएवंपरिक्रम्य रथादवतार्यप्रासादद्वारसन्मुखंबलिं
गंकृत्वाऽर्घ्यंदत्वाप्रासादंप्रवेशयेदिति ततःसयजमानोदेशिकोदेवंपिंडिकायांस्थापयेत् तद्यथा स्कलग्नेईश्वरंभावयन् श्वभ्रन्यासद्रव्यसहि

नंत्रौवर्णपञ्चंशवक्त्रेनिधाय प्रधानपुरुषोयावद्यावच्चंद्रदिवाकरौ तावत्त्वमनयाशक्त्यायुक्तोत्रैवस्थिरोभवेत्युक्त्वा ध्रुवाद्यौर्ध्रुवापृथिवीतिमं-
त्रंपठित्वायवंयवार्द्धंवोत्तराश्रितमीशानाश्रितंवादेवंपिंडिकाश्वक्त्रेनिधाय स्थिरोभवशाश्वतोभवे त्युक्त्वापिंडिकालिंगांतरालेवालुकासी-
सकादिभिर्दृढपूरयित्वापुनर्न्नचालयेत् ततोविश्वतश्चक्षुरित्युक्त्वादेवमूर्न्धिहस्तंनिधाय परंदेवंध्यात्वा रुद्रसूक्तरैवतसामनीजप्त्वाप्राति
विकन्मंत्रान्जपेत् तत्रविष्णोः अतसीपुष्पसंकाशंशंखचक्रगदाधरं संस्थापयामिदेवेशंदेवंभूलाजनार्दनं रुद्रस्य त्र्यक्षंचदशबाहुंचचंद्रा
र्द्धकृतशेखरम् गणेशंवृषभस्थंचस्थापयामित्रिलोचनम् अथब्रह्मणः ऋषिभिःसंस्तुतंदेवंचतुर्वक्त्रंजटाधरम् पितामहंमहाप्राज्ञंस्थाप
याम्यंबुजोद्भवम् सूर्यस्य सहस्रकिरणंशांतमप्सरोगणसेवितम् पद्महस्तंमहाबाहुंस्थापयामिदिवाकरम् ततोदेवस्यहृदयंस्पृशन्
जपेत् तद्यथा विष्णोःपुरुषसूक्तं रुद्रस्यरुद्रं ब्रह्मणोब्राह्मं रवेःसौरम् अन्येषांतत्तत्प्रकाशकान्मंत्रान्जपित्वा प्रणवव्याहृतिभि-
रःसहितांगायत्रींप्राणसूक्तंचजपित्वासांनिध्यंकुर्यात् नमस्तेत्यक्तसंगायसंतोषपरमात्मने ज्ञानविज्ञानरूपायब्रह्मतेजोनुशालिने गुणाति
क्रांतवेगायपुरुषायमहात्मने अव्यक्तायपुराणायविष्णोसन्निहितोभव भगवन्देवदेवेशत्वंपितासर्वदेहिनां त्वयाव्याप्तमिदंसर्वंजगत्स्था
वरजंगमम् त्वमिंद्रःपावकश्चैवयमोनिर्ऋतिरेवच वरुणोमारुतःसोमोईशानप्रभुरव्ययः येनरूपेणभगवान्व्याप्तंत्रिभुवनत्रयम् तेनरूपेण
देवेशअर्चायांसन्निधोभव सर्वमंत्रादिदेवेशलोकानुग्रहकाम्यया अत्रार्चायांमहादेवभवसन्निहितःसदा सूर्याचंद्रमसौयावद्यावत्ति-
ष्ठतिमेदिनी तावत्त्वयात्रदेवेशस्थातव्यंस्वेच्छयाप्रभोइति अथस्थापितस्यपरिवारदेवताः नंदिमहाकालवृषभभृंगिरिटिस्कंदोमावि-

नायकविष्णुब्रह्मजयंतेंद्राग्नीयमनिर्ऋतिवरुणवायुसोमेशानाप्सरोगणगंधर्वगुह्यकविद्याधरादीन् रुद्रस्य ब्रह्मणोविष्ण्वादयः
परिवारदेवताः विष्णोर्ब्रह्मादयः एवंचंडिविनायकादीनामपिपरिकल्पनं ततः कुंडेष्वंगहोमः ततः पूर्वकुंडेहृदयमंत्रेणाज्याहुतिर्वि
शतिकं दक्षिणकुंडेशिरोमंत्रेण पश्चिमेशिखामंत्रेण उत्तरेकवचमंत्रेण आचार्यकुंडेनेत्रमंत्रेण पुनः पूर्वकुंडेअस्त्रमंत्रेण ततः आ
युधमंत्रैर्हुत्वाप्रार्थयेत् तद्यथा लोकानुग्रहहेत्वर्थंस्थिरीभवस्वासने सान्निध्यंहिमहादेवप्रत्यहंपरिवर्त्तय माभूत्पूजाविरा
मोस्मिन्यजमानः समृध्यताम् संपादयसताराष्ट्रं सर्वोपद्रववर्जितम् क्षेमेणवृद्धिमतुलांस्वबमक्षयमश्नुताम् इतिसंप्रोच्यविधि
नादेवंसांगंसमर्चयेदिति ततोबाहिरिंद्रादींस्तत्तन्मंत्रैःस्थापयेत् विष्णुश्चैवचंडप्रचंडजयविजयान् शिवश्चैवनंदिमहाकालभृंगि-
गणेशान् सूर्यश्चैवदंडपिंगलमाठरारुणान् अथशिवस्यवाहनादिपूजयेत् यस्यसिंहारथेयुक्ताव्याघ्रीभूतास्तथोरगाः ऋषयो-
लोकपालाश्चसोमोविष्णुःपितामहः नागायक्षाःसगंधर्वायेचदिव्यानभश्चराः तमहंत्र्यक्षमीशानंशिवंरुद्रमुमापतिम् आवाह-
यामिसगणंसपत्नीकंवृषध्वजम् आगच्छभगवन्रुद्रानुग्रहायशिवोभव शाश्वतोभवपूजांमेगृहाणत्वंनमोस्तुते ओंस्वागतमनु-
स्वागतमनुस्वागतंभगवतेनमोनमः सोमायसगणायसपरिवारायप्रतिगृण्हातु ओं भगवन्मंत्रपूतमिदमर्घ्यंपाद्यमाचमनीयमा-
चमनीयमासनंब्रह्मणाभिहितंनमोनमःस्वाहेति आगच्छभगवन्नित्यादिकामंत्राऊहेनसोमायपदवर्जिताःसर्वसाधारणा एवंसंपूज्य
दधिदुग्धघृतमधुशर्करारव्यैःसमंत्रैर्मध्येस्रगंधजलप्लुतेःस्नापयेत् ततोविराट् सहस्रशीर्षा॰ अभित्वाशूरनो॰ पुरुषएवेदं॰ नत्वावाँ॰

इतिचतुःकृत्वाजपेत् मंत्रिसपर्याः चजलेनदेवस्यपादौनाभिवक्षःशिरश्चस्पृशेत् ततोलिंगमंत्रैःप्रार्थयित्वा भगवन्देवदेवेश धर्मकामार्थ
मोक्षद विद्याविद्येश्वरैरुद्रैर्गणेशैर्लोकपालकैः देवदानवगंधर्वैर्यक्षैश्चसहकिन्नरैः अस्मिन्लिंगेमहादेव सर्वदात्वंसर्वेप्रभो पुंसाम-
नुग्रहार्थायपृथिव्यांस्वेच्छयाप्रभो परावरेणभावेनस्थातव्यंसर्वदात्वया सर्वविघ्नहरःपुंसांसर्वदुःखहरःसदा सर्वदायजमानस्यइ-
च्छासंपत्करोभव नमस्तेसर्वधर्माय संतोषविजितात्मने ज्ञानविज्ञानतृप्तायब्रह्मतेजोभिशालिने नमस्तेशम्भुदेहायपुरुषायमहात्मने
स्थापकानांमूर्तिपानांशिल्पिनांचविभोसदा ग्रामदेशनृपाणांचशांतिर्भवतुसर्वदा पूजकाराधकानांचभक्तानांभक्तवत्सल सर्वेषांच
जगन्नाथरक्षासिद्धिप्रदोभव चंद्रार्कावनिपर्यंतलिंगेऽस्मिन्परमेश्वर स्थातव्यमुमयासार्धंसर्वलोकानुकंपया यावच्चंद्रश्चसूर्यश्च-
यावत्तिष्ठतिमेदिनी तावत्त्वयाऽत्रदेवेशस्थातव्यंस्वेच्छयाविभो इति ततःपुरुषसूक्तेनविष्णुंषोडशोपचारैःसंपूज्य पुराणमंत्रैर
न्यैर्वास्तुत्वानमेत् पुनःप्रार्थयेच्च ज्ञानतोऽज्ञानतोवापियावद्विधिरनुष्ठितःसर्वंस्त्वत्प्रसादेनसंपूर्णोभवतान्ममेति शिवस्यापि ज्ञान
तोऽज्ञानतोवापिभगवन्यत्कृतंमया तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादादधोक्षजेति अथकर्तृनामयुतंदेवनामकुर्यात् सर्वदाव्यवहारार्थंतच्चवि
ष्णोरमुकस्वामी अमुकनारायणइतिवा शिवस्य अमुकेश्वरः रवेरमुकादित्यः देव्याअमुकेश्वरी गणपतेरमुकविनायकइति अथनै-
मित्तिकदोषप्रायश्चित्तम् तत्रस्थाप्यमानदेवार्चालिंगंवायांयांदिशमुपाश्रयेत्तत्तद्दिगीशमंत्रेणाष्टोत्तरशतसंख्ययाशमीपलाशान्यत
मसमिद्धोमंतिलहोमंकृत्वा पूर्णाहुत्यंतंकुर्यात् दिगीशमंत्रास्तुत्रातारमिंद्रमित्यादयःप्रसिद्धाः अत्राचार्यदक्षिणाश्वक्रमेण गजो-

सेषोमहिषो ऽजः शुक्तिर्मुक्ताफलंवस्त्रयुग्मं धेनुर्वृषभइत्यादिकास्तदभावेसुवर्णप्रतिकृतयः राजतोवावृषभइति ततः स्थाप्यमानेदेवे-
शब्दोत्थानेश्वभ्रान्तेस्फुटितेवाशांत्यर्थंमूलमंत्रेणाष्टोत्तरशतंहुत्वा प्रतिष्ठाहोमंकुर्यात् शिवायस्थिरोभवस्वाहा शिवायाप्रमेयोभ-
व॰ शिवायविबोधोभव ॰शिवायनित्योभव॰ शिवायसर्वगोभव॰ शिवायअविनाशोभव शिवायक्लृप्तोभवस्वाहेति अथसर्वशांत्यर्थ-
मघोरमंत्रेणाष्टोत्तरशतंस्विष्टकृदंतंहुत्वा सर्वप्रायश्चित्तंचहुत्वा पूर्णाहुतिंहुत्वा इशानेबलिंदत्वाचामेत् शोभमानासनेयजमानमु
पवेश्याथर्वणसाम्नामंत्रांतरैश्चाभिषिंचेत् अथाचार्यपूजनं तत्रयजमानआचार्यमासनेउपविश्यसत्कृत्यग्रामगोसहस्रमर्धंतदर्धंवा
गोशतमर्धंवावृषभैकादशकंपंचकंसालंकृतंयथाशक्तिसन्निधायदेशकालौसंकीर्त्य देवप्रतिष्ठासिद्ध्यर्थमिमांदक्षिणांतुभ्यमहमा
चार्यायसंप्रददे नममेत्युक्त्वातद्धस्तेगोपुच्छादिसतिलकुशयवतुलसीसहितंजलंक्षिपेत् विज्ञापयेच्च भगवन्सर्वधर्मज्ञशिवशा-
स्त्रपरायण सर्वशास्त्रार्थतत्वज्ञशिवशास्त्रविशारद अनादिजन्मसंतानेत्यप्रमेयेभवार्णवे अद्यमेत्यक्तमंजन्मअद्यमेसफलंधनम्
अद्यमेजननोच्छित्तिरद्यमेपरमंपदम् मोचितोऽहंत्वयानाथदुश्छेद्याद्भवबंधनात् ईशनातस्त्वयायस्मादप्रमेयाद्भवार्णवात् मुक्तो
हंमर्त्यसंसारात्सपन्नोऽहंतवांतिकम् ज्ञानतोऽज्ञानतोवापि यन्न्यूनयत्कृतंमया तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादात्समस्तमेइति गुरु
रपि समस्तजगदुत्पत्तिस्थितिसंहारकारकः शिवःशिवःसानुचरःसर्वदासर्वकामदः द्रव्यहीनंतुयत्किंचिद्विधिहीनंतुयद्भवेत्
तत्सर्वंपूर्णमेवास्तुप्रसादात्कारणस्यतु स्थापकस्यमूर्तिपानांशिल्पिनांवर्णिनांतथा सराष्ट्रपार्थिवानांचशांतिर्भवतुसर्वदा मृत्य-

पुत्रकलत्रेभ्यस्स्वमित्रबलवाहनैः कारणस्यप्रसादेनसर्वलोकेश्वरोभवेत्युक्त्वायजमानायाशिषंदद्यात् ततः स्थापकमूर्तिपजपिनः
ऋत्विक्स्थपतिदैवज्ञान् संपूज्य तेभ्यः शक्तितोदक्षिणांदद्यात् अधिवासनंसद्योबहुकालसाध्यंवा तत्रसद्यः पक्षेवक्ष्यमाणमधुकुंकुमा
दिसर्वद्रव्यैस्तद्दिनएवदेवंलेपयेत् अन्येतुप्रथमेऽह्नि कुंकुमेनदेवंलेपयित्वापूजयेत् द्वितीयदिनेहरिद्रासिद्धार्थकचूर्णेन एवंतृती
यदिनेपिष्टसितचंदनयवचूर्णेन चतुर्थदिनेमनःशिलाप्रियंगुचूर्णेन सर्वलेपनद्रव्येषुकपिलाघृतमिश्रणंज्ञेयम् प्रतिमानांलेपत्रय
दिनत्रयेक्रमेणकृत्वा शेषलेपांश्चतुर्थदिनेयुगपत्कृत्वा त्रिसंध्यंबलिदानंचनिर्वर्त्य प्रतिकुंडेहवनंसंपादयेत् शांतिहोमंचऋत्विजःकु
र्युरित्यनेकदिननिर्वर्त्येऽधिवासनेज्ञेयम् शिवस्यतुयदाप्रतिष्ठोत्तरकालंसप्तसुदिनेषुमधुकुंकुमादिलेपाः क्रियंते तदा अष्टमदिनेस्न
पनार्चनादिर्महानुत्सवोविधेयइतिसर्वदेवप्रतिष्ठापनविधिः अथचतुर्थीकर्म तच्चतुर्थदिनेद्वितीयदिनेवाकुर्यात् तत्रप्रागेवदेवाचार्योमू
र्तिपयजमानद्वारपालादिभिः सहमंडपपश्चिमद्वारेणप्रविश्य तत्रमहस्नानसंभारादिकमुपकल्प्य वेद्याःप्रादक्षिण्येन कुंडेस्थापितदे
वत्यंचरुंश्रपयित्वा पंचब्रह्मभिरंगसहितैः सहस्राहुतिहोमंकुर्यात् ब्रह्ममंत्रायथा ईशानःसर्वविद्याना॰ तत्पुरुषायविद्महे॰ अ
घोरेभ्योथघोरेभ्यो॰ वामदेवायनमोज्येष्ठायनमो॰ सद्योजातंप्रपद्यामीतिप्रागुक्ताअंगमंत्रा अपि अद्भ्यःसंभूतः॰ वेदाह॰ प्रजापतिः
योदेवेभ्य॰ रुचंब्राह्ममिति ततऋत्विजोघृतेनतिलैर्वास्वकुंडेशतंहुत्वागौरीर्मिमायेतिमंत्रेणजुहुयुरिति शिवस्यचतुर्थीकर्म एवम
न्यदेवविषयेपि पूर्ववत्स्थापितदैवत्यंचरुंश्रपयित्वा स्वमंत्रैः पत्नीमंत्रैश्चसहस्रंहोमंकुर्यात् ऋत्विजापिघृतेनशतंशतंप्रतिकुंडेहु-

त्वा पूर्णाहुतिंजुहुयुः गुरुश्चशालितोयेनमूर्तिंसिक्त्वा निर्माल्यमपसार्य पुनः पूजयित्वा एकाशीतिपदान् पूर्ववत्संस्थाप्यस्नापयेदिति
यद्वापुराणांतरोक्तप्रकारेण पूजयेत् तत्रदध्यक्षतकुशाग्रक्षीरदूर्वामधुयवसिद्धार्थकपुष्पफलतोयान्वितमर्घ्यपात्रमासाद्यकलशाष्टसह-
स्रमष्टशतमष्टौचतुरोवाकलशान्सौवर्णान्राजतान्ताम्रान्रीतिकमयान्मृन्मयान्वोपकल्प्य तेषुशंनोदेवीरापोहिष्ठेतिमंत्रैरुदकंतीर्थज-
लंप्रक्षिप्य मृद्गोमयक्षीरदधिमधुघृतशर्करौषधिपुष्पफलकुशरत्नगंधपंचगव्यादिकंप्रक्षिप्य ततः समुद्रंगच्छ स्वाहेतिमंत्रेण देवायार्घ्यंसमर्प्य स्नापयेत् तद्यथा पंचनद्यइतिपंचगव्येन दधिक्राव्णइतिदध्ना आप्यायस्वेतिक्षीरेण तेजोसीतिघृतेन मधुवातेतिमधुना
देवस्यत्वासरस्वत्यैभैषज्येनेतिपुष्पोदकेन परिवाजपतिरितिरत्नोदकेन देवस्यत्वेतिकुशोदकेन अग्नआयाहीतिफलोदकेन समुद्रज्येष्ठा
इतिपूर्वकल्पितशीतजलेन वासोःपवित्रमसीतिसहस्रधाराकुंभेन ततः तूष्णींस्नपनम् ततःअंधस्याधोवोइतिपंचवर्णसूत्रेणनीराज्य
बलिंहरेत् मुंचन्तुमाशपथ्यादितिकौतुकंविसृज्य स्रगंधवस्त्रेणपंचनद्यइतिदेवंपरिमार्ष्टि मंदाकिन्यास्तुयद्वारि सर्वपापहरंशुभम्
तदिदंकल्पितंदेवसम्यगाचम्यतांत्वयेति आचमनीयंनिवेदयेत् देवसूक्तसमायुक्तेसर्वयज्ञसमन्विते सर्ववर्णप्रदेदेव वाससीप्रतिगृ-
ह्यताम् इतिवस्त्रयुग्मंनिवेदयेत् शरीरंतेनजानामिचेष्टांनैवचनैवच मयानिवेदितंभक्त्याचंदनंप्रतिगृह्यतामितिकुंकुमकर्पूरयुक्त-
चंदनचर्चितम् मणिमुक्ताप्रवालाद्यैःस्वर्णपुष्पैर्मयाकृता पूजातुदेवदेवेशप्रसादाद्भवतस्तवेतिपुष्पंनिवेदयेत् वनस्पतिरसेतिधूपंनिवे-
दयेत् त्वंचंद्रस्त्वंरविर्विष्णुस्त्वंरत्नानिहुताशनः त्वमेवसर्वज्योतींषिदीपोयंप्रतिगृह्यताम् इतिदीपमंत्रः अशीत्याचत्वारिंशतावादीपै-

राराार्त्तिकं अन्नंचतुर्विधमितिनैवेद्यं संभूषायेतिभूषणानिदत्वा पूर्वकृतंहोमंनिवेद्यप्रार्थयेत् यन्मयाभक्तियोगेनपत्रंपुष्पंफलंजलम्
आवेदितंचनैवेद्यंतद्गृहाणानुकंपया मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर यत्पूजितंमयादेवपरिपूर्णंतदस्तुमेइति ततःपुनरष्टोत्तरस
हस्रंमूलमंत्रेणहुत्वांगानांदशांशेनपूर्णाहुत्यंतंकृत्वा स्वस्तिवाचनंकारयित्वा इंद्रादिभ्योबलिंदत्वाचभ्यशेषंसमापयेदितिचतुर्थीकु-
र्मविधिः अथशैवचंडपूजा चतुर्थीकर्मदिनेदिनांतरेवा अमुकलिंगप्रतिष्ठांगतयाचंडप्रतिष्ठांकरिष्ये इतिसंकल्प्य प्रासादाद्बहिर्ग-
र्भगृहार्धसूत्रांतराले ईशान्यांचंडंस्थापयेत् पीठादौचंडमूर्तिंसंस्थाप्यपूजयेत् तत्रध्यानं रुद्राग्नेः प्रभवंचंडंकज्जलाभंभयानकम्
शूलदंडधरंरौद्रंचतुर्वक्त्रंचतुर्भुजं मुखोद्गीर्णमहाज्वालंरक्तद्वादशलोचनम् जटामुकुटखंडेंदुमंडितंफणिकंकणम् व्यालयज्ञोपवी-
तंचमाक्षसूत्रकमंडलुं श्वेतपद्मासनासीनंभक्तिग्रहार्त्तिनाशनमित्येवंध्यात्वा ओंचंडासनायनमः ओंचंडमूर्तयेनमः ओंधुनिचं-
डेश्वरायस्वाहेतिमंत्रेणावाह्य ओंचंडहृदयायहुंफट्नमः ओंचंडशिरसेहुंफट्नमः ओंचंडशिखायैहुंफट्नमः ओंचंडकवचाय
हुंफट्नमः ओंचंडअस्त्रायहुंफट् करयोरस्त्रं ओंचंसद्योजातायहुंफट् ओंचिंवामदेवायहुंफट् ओंचुंअघोरायहुंफट् ओंचैंतत्पुरुषा
यहुंफट् ओंचोंईशानायहुंफट् इतिन्यासंकृत्वाषोडशोपचारैःपूजयेत् यावत्तिष्ठतिलोकेस्मिन्देवदेवोमहेश्वरः तावत्कालंत्वया-
देवस्थातव्यंशिवसन्निधौइति ततोदिग्बलिंकृत्वाभूतानिविज्ञापयेत् यथा यावत्कालंमहादेवोलिंगमाश्रित्यतिष्ठति तावत्कालंतुर-
क्षार्थंयूयंतिष्ठतसर्वदेति ततोगुरुःकर्मशेषंसंपाद्यभद्रासनेयजमानमुपवेश्याभिषिंचेत्तत्रदेवस्यत्वेति• शंनोदेवीः• अथर्वणसाप-

स्नुरास्त्वित्याद्योमंत्राः यजमानोमहाजलाशयेअवभृथस्नानंकृत्वा मंडपमागत्यगुर्वादीन्संपूज्य हिरण्यगर्भेतिदक्षिणांदत्वा सोप स्करांपयस्विनींगांचदद्यात्गुरुश्च समस्तजगदुत्पत्तिस्थित्यनुग्रहकारकः शिवःसानुचरःस्नाद्ः सर्वदासर्वकामदइतिमंत्रेणाशिषोद द्यात् यथाशक्त्याब्राह्मणभोजनम् क्वचिच्चंडोनास्तीतित्रिविक्रमः ब्राणलिंगेचलोहेचसिद्धलोहेस्वयंभुवि प्रतिमासुचसर्वासुन- चंडोधिकृतोभवेदिति इतिचंडपूजा अथचलप्रतिष्ठाबौधायनाद्युक्ता नवशक्त्वोदेशमंडपंतदंतःपर्ताच्यामुदीच्यामीशान्यावाकुंडंत दुत्तरतःस्नानोपकरणानि नैर्ऋतेवास्तुमंडलंमध्येवेद्यांसर्वतोभद्रमंडलं तदुत्तरेस्वस्तिकोपरिशय्यास्थानंचकृत्वा पूर्वदिनेवाप्रतिष्ठादि नेवागणपतिपूजापुण्याहवाचनंकृत्वा मातृकापूजनाभ्युदयिकश्राद्धानिकृत्वा गुरुमष्टौचतुरोवाऋत्विजश्चवृत्वापूजयेत् ततोगुरुःमं डपप्रतिष्ठामग्निस्थापनंकृत्वा स्थाप्यदैवत्यनैवारंचरुंश्रपयित्वाज्यभागांतेपलाशसमिद्भिः प्रत्येकमष्टसहस्रमष्टशतंवाप्रतिदेवंवलोक पालमंत्रैर्व्याहृतिभिर्वाजुहुयात्तावत्संख्याकमाज्यहोमंचकृत्वास्थाप्यदेवताकमंत्रेणसमित्तिलाज्यानांप्रतिद्रव्यंदशाहुतीःस्विष्टकृतंन हुत्वाअष्टसहस्रमष्टशतंवास्थाप्यदेवतामंत्रेणजपेत् अथयजमानोगुरवेवरंदद्यात् ततोगुरुर्देवंपंचगव्यैःपंचामृतैश्चपृथक्तत्तन्मंत्रैः शंनोदेवीतिसंस्नावकलशेनसंस्नाप्य क्षीरवंडिनाद्यैरन्नलिप्योष्णोदकेनप्रक्षाल्य पुनःचतुर्भिःकलशैःसमुद्रज्येष्ठाइत्यादिअभिषेकमंत्रैः चतुर्भिःक्रमेणाभिषिंच्य भद्रपीठेनिवेश्याष्टौकलशान्तोयपूर्णान्पूर्वादिक्रमेणसंस्थाप्य सप्तमृदःपल्लवान्कुशान्शांत्युदकंप्र स्रवणोदकंयवान्पुष्पाणिफलानिचक्रमेणनिक्षिप्य स्थापनक्रमेणकुंभैःस्नापयेत् तत्रमंत्राः आपोहिष्ठेतितिसृभिः हिरण्यवर्णाः

शुचयइतिचतुष्टयं पावमानः स्कवर्जनइत्यनुवाकेनं सस्नाप्याहतेंवाससीपरिधाप्योपवीतं दत्वा गंधपुष्पधूपदीपैः संपूज्य हिरण्यगर्भइ
तिअष्टभिः पैष्टैरष्टभिर्दीपैनीराज्य हिरण्यशलाकां गृहीत्वा चित्रंदेवानामित्यर्धेन देवनेत्रे उन्मील्यांजंतित्वामध्वरं इति अंजनेनांजयि
त्वा पुनर्मधु घृत शर्कराभिर्देवस्यत्वेतिजपेन् मंत्रांते अनर्ज्मातिवाक्यशेषः ततोभक्ष्यभोज्यादर्शादिदर्शयेत् तदाग्रेकोपिनतिष्ठेन्
ततोदर्भेष्वासीनोदर्भान्धारयमाणः पुरुषसूक्तेनस्तुत्वा वंशपात्रेपंचवर्णान्वितमन्नं प्रक्षिप्य देवंनीराज्य भूताधिपतयेदीप्तमूलधरा-
यामापतयेसर्वविद्याधिपतयेरुद्रायनमः शिवमगाहितंकर्मास्तुस्वाहेतिबलिंदत्वाचामेत् ततोमंडलदेवतागंधादिनासंपूज्य स्थाप्यदेवं
तत्तल्लिंगमंत्रैरावाह्यकर्णिकायांप्रतिष्ठाप्य गंधाद्यैः संपूज्य कुंडेमंडलदेवतामंत्रैर्दशदशतिलाहुतीर्हुत्वा शय्यायांदेवमारोप्य पुरुषसू
क्तोत्तरनारायणाभ्यांब्राह्मणैः सहोपतिष्ठेत ततोदेवेपुरुषात्मनेनमः प्राणात्मनेनमइति शरीरेव्यापकंन्यसेत् प्रकृतितत्वायनमोहृदि
रसनत्वायनमोबस्तौ गंधतत्वायपादयोः श्रोत्रतत्वायकर्णयोः त्वक्तत्वायसर्वशरीरे चक्षुस्तत्वायचक्षुषोः जिह्वातत्वायजिह्वायां घ्रा
णतत्वायघ्राणे वाक्तत्वायवाचि पाणितत्वायपाण्योः पादतत्वायपादयोः पायुतत्वायपायौ उपस्थतत्वायोपस्थे पृथ्वीतत्वायपादयोः
अप्तत्वायबस्तौ तेजस्तत्वायहृदि वायुतत्वायघ्राणे आकाशतत्वायशिरसि रजस्तत्वाय तमस्तत्वाय सत्वतत्वाय देहतत्वायेतिदेहे त-
तोपिपुरुषसूक्तन्यासंकृत्वासंपूज्याधिवासयेत् ततोमंडलशय्ययोर्मध्येनगंतव्यम् मंडलदेवतानामुपहारनिवेदनं तत्रसर्वान्नंब्रह्मणे
घृतान्नंसोदकंइंद्राय आज्यान्नमग्नये माषान्नंयमाय कृष्णव्रीह्यन्नंसघृतंनिर्ऋतये नवनीतोदनंवरुणाय यवोदनंवायवे प्रैयंगवंसोमा

य गावेधुकमीशानाय पायसंवासर्वेभ्यः ततःशय्याप्रवेशेनैवारुं चरुंस्थापयित्वातेनदिग्बलिंदत्वानिशांनयेदित्यधिवासनं प्रातररुणो
दयेदेवमुत्थाप्यमूलमंत्रेणोपस्थाय घृतेनचरुंश्रपयित्वाऽभिघार्यमूलमंत्रेणाष्टोत्तरसहस्रमष्टशतंवाहुत्वा अग्नयेस्वाहासोमायस्वाहा
धन्वंतरयेस्वाहा कुह्वैस्वाहा अनुमत्यैप्रजापतयेपरमेष्ठिनेब्रह्मणे अग्नयेसोमाय अग्नयेन्नादाय अग्नयेन्नपतये प्रजापतये विश्वेभ्योदे
वेभ्यः सर्वेभ्योभूतेभ्यः भूर्भुवःस्वः अग्नयेस्विष्टकृतेस्वाहेतिजुहुयुः ततोयजमानोगुरवेवरंदद्यात् ततःउदितेसूर्येगुरुर्वेद्यामेवदेवमभि
मुखंकृत्वा रत्नपुष्पमूलफलौषध्यादिदर्शयित्वाताम्रपात्रेशांतिजलमादायमूलमंत्रेणशतवारमभिमंत्र्य देवशिरसिअभिषिंच्योत्तिष्ठब्र
ह्मणस्पतेइत्युत्थाप्य विश्वतश्चक्षुरित्युपस्थायदेवस्यपुरस्तात् ओंब्रह्मविष्णुरुद्रेभ्योनमः दिक्पालेभ्योनमः वसुभ्योनमः रुद्रेभ्यो॰
आदित्येभ्योनमः अश्विभ्यां॰ मरुद्भ्यो॰ कुबेराय॰ गंगादिमहानदीभ्यो॰ अग्नीषोमाभ्यां॰ द्यावापृथिवीभ्यां॰ इंद्राग्निभ्यां॰ धन्वंतरये॰
सर्वेशाय॰ विश्वेभ्योदेवेभ्यो॰ ब्रह्मणेनमइतिजपित्वा देवस्यपुरतोयजमानमभिषिंच्य देवमंत्रंजप्त्वाध्रुवसूक्तेनतल्लिंगमंत्रेणपुरुषसूक्तेन
गायत्र्यान्यात्स्तुतिभिर्देवंप्रतिष्ठाप्य प्रतिमायांनिजवाहनायुधपरिवारादिकंध्यात्वा पुनःपूजयित्वामुद्रांप्रदर्श्य मूलमंत्रमष्टोत्तरशतंजप्त्वा
स्तुत्वानत्वाचम्य स्विष्टकृदाद्युत्तरांगानिसमापयेत् ततोयजमानादक्षिणांदद्याद्विप्रांश्चभोजयेद्यथाशक्ति इतिचलार्चाप्रतिष्ठा अ
थजीर्णोद्धारविधिः अग्निपुराणे जीर्णादीनांचलिंगानामुद्धारविधिमान्वदेव लक्ष्मोज्झितंचभग्नंचस्थूलंवज्रहतंतथा संपुटंस्फुटितंव्यंगं
लिंगमित्येवमादिकम् वदेदितिदुष्टलिंगानांत्याज्यत्वम् लक्ष्मोज्झितंबाणादिक्रमेणातद्विधिनास्थापितंतल्लक्षणरहितम् भग्नमनेकशकली

घूतं स्थूलंपिंडिकानन्तुरूपम् वज्रहतंविद्युद्धतं संपुटंन्युब्जं स्फुटितमेकदेशेभग्नं व्यंगंपिंडिकाप्र पाल्वाराहितं आदिपदेनचांडालस्पृ
ष्टादीनांग्रहणं पिंडीवृषयोर्दुष्टत्वेतयोरेवत्यागोनलिंगस्य चालितंचलितंनिम्नमत्यर्थंविषमस्थितं दिङ्मूढपतितंलिंगंमध्यस्थंपति
तंतथा एवंविधंचसंस्थाप्यंनिर्व्रणंचभवेद्यदि नादेयनग्रवाहेणतदणाक्रियतेयदि ततोन्यत्रापिसंस्थाप्यंविधिदृष्टेनकर्मणेति निम्नंसा
मंतम्भूभागान्निम्नायांभुविव्यवस्थितं विषमस्थितंयत्रपूजादिकर्तुंनशक्यतेतस्मिन्देशेव्यवस्थितंदिङ्मूढंविशेषविध्यभावेपिउदगतिरि
क्तदिक्प्रणालीकंपतितंगर्तादौ मध्यस्थंसंपूर्णपिंडिकाश्वभ्रंतगतंप्रासादमध्यभागेस्थितमित्यपिकेचित् एवंविधमित्यन्येलक्ष्मोज्झित
भग्नस्फुटितविद्धत्थतातिरिक्तानांग्रहणम् तेनेजघन्योनिर्व्रणशब्दोपिलक्ष्मोज्झितायतिरिक्तानामेवोपलक्षकः पीठाच्चचालितंलिंगंनिर्दो
षंतुभवेद्यदि ततोपिस्थापयेत्तत्रजपेल्लक्षमघोरकम् त्यजेत्सर्वार्चितंलिंगंश्वपचाद्यैश्चसेवितम् लिंगांतरंप्रतिष्ठाप्यविशुद्धिमधिगच्छति
इतिसिद्धांतशेखरोक्तेः तत्रैव लिंगादीनांवजीर्णानां प्रोच्यतेविधिरुत्तमो सर्वारिष्टविनाशार्थंसर्वप्राणिहितार्थकः लिंगस्यपिंडिका-
याश्चप्रतिमासुरवलिंगयोः सर्वेषांपरिवाराणांहर्म्यप्राकारयोस्तथा उद्धारश्चावृतिःप्रोक्ता ऽथोत्थारेहेतुरुच्यते आवृतिःपुनःसंस्कारः
स्फुटितंखंडितंभग्नंदग्धंवाग्रानिनाग्निना उन्मत्तैःशत्रुभिश्चोरैःकरिणास्रोतसाहृते लिंगेपीठादिकेचापिविशीर्णेकालपर्ययात् देहजी
र्णंयथादेहीत्यक्त्वान्यदुपगच्छति लिंगादीन्यपिजीर्णानितथासुंचतिदेवतं खंडितंचूर्णितंलिंगंप्रेताद्याआश्रयंतियत् लिंगाद्यसत्वस्मृ
न्यत्वात्तथान्वब्रह्मराक्षसाः कर्तुर्नृपाणांराष्ट्रस्यतद्ग्रामस्यविशेषतः पीडांकुर्वंतितेतस्मात्दुर्भिक्षमरणादिकम् तस्मात्सर्वप्रयत्नेनकु-

र्णोद्धारणक्रियाम् स्वायंभुवेचलिंगेचबाणलिंगेतथैवच ऋषिभिश्चासुरैर्देवैस्तत्त्वविद्भिःप्रतिष्ठिते लिंगेजीर्णादिदुष्टेपिनोद्धारंतत्रका
रयेत् इदमपिस्वायंभुवादिव्यक्तिविषयं नतुदैवात्तद्व्यक्तिनाशेनतत्स्थानस्थापितेदानींतनतादृशव्यक्तिविषयम् स्वायंभुवादिलिंगानांजी
र्णपीठंपरित्यजेत् उक्तैर्जीर्णादिभिर्दुष्टंमानुषंतुपरित्यजेत् द्विखुदंपतितंस्थानान्मध्यस्थंस्रोतसाहृतम् चौराद्यैश्चालितंलिंगंस्थापयेत्पुनि
व्रणंपुनः लोहाद्यंछिन्नभिन्नांगंसंधायस्थापयेत्पुनः सुवर्णाद्यष्टलोहनिर्मितंलिंगंदेवाङ्मंसत्तदेवसञ्ज्ञंकृत्वापुनःस्थापयेदित्यर्थः
बाहुपादशिरोहीनाकर्णनासास्यहीनकां तादृशींपरिवाराणांप्रतिमांपरिवर्जयेत् यद्द्रव्यंयत्प्रमाणंचलिंगंवाप्रतिमापिवा तादृक्कृतेनैव-
मानेनतद्द्रव्येणप्रकल्पयेत् कारयेन्नान्यमानेननान्यद्रव्येणतत्पुनः नान्याकारंचनान्यत्रस्थापयेत्तद्गुरूत्तमः स्रोतसापहृतंलिंगंप्रासादेवा
तदन्यतः तत्समीपगतेदेशेस्थापयेद्बाधवर्जिते प्रासादपतितेहर्म्येगोपुरेमंडलादिके तदाकारंचतद्द्रव्यंतन्मानंतत्रकारयेत् कूर्मपो-
त्याःशिलाग्रात्याहृढकाश्चतथाविधाः हीनद्रव्यकृतंकर्मश्रेष्ठैर्द्रव्यैःसमाचरेत् हीनंवाप्यधिकंमानमाकारंवानकारयेत् एवमुक्तेनमान
र्गेणदोषैरुक्तैर्विचार्यच लिंगपीठादिकंजीर्णंतदुत्थारंतथाचरेत् तिथिनक्षत्रवारादितदर्थंनविचारयेत् जीर्णंचोद्धारयेद्विद्वान्जीर्णंनैव
चालयेत् तस्मान्नधारयेज्जीर्णमजीर्णंरक्षयेद्बुधः सुस्थितंदुःस्थितंवापिशिवलिंगंनचालयेत् शतेनस्थापनंकुर्यात्सहस्रेणतुचालयेत्
अस्यश्लोकस्यवाक्यार्थोवर्ण्यतेयथागमं नित्यपूजादिभिर्युक्तंजीर्णाद्यमपिसुस्थितं हीनंपूजादिभिर्लिंगमजीर्णमपिदुःस्थितम् देवता
स्थापितंमोहाद्यदिनिम्नत्वमागतम् तल्लिंगंदुःस्थितंवापितन्त्रज्ञैरितिनिश्चितं सहस्रादिकहोमेनतस्यचालनमीरितं स्थापनंशतहोमेन

तस्यलिंगस्यचोदितं एवंबहुविधैस्तन्त्रैर्दोषाश्चबहुधोदिताः परीक्ष्यबहुधातांश्चजीर्णलिंगंसमुद्धरेत् हयशीर्षागमेपि जीर्णोद्धारविधिं-
कृत्स्नं संक्षेपात्सब्रवीमि ते चालितापाटिताभूमिः केनचित्सापकर्मणा चंडालपतितस्पर्शदूषितावन्हिनाच्चया स्वयमपि नीताजीर्णान
क्ष्वेगादिपातिता अपुण्यजलसंस्पृष्टाविप्रदत्तजदूषिता पतिताद्यर्चिताश्लेष्माविपमूत्रादिविदूषिता सव्रणालक्षणोपेतासंस्कार्यादेशि
केनतु भूमिर्लिंगमीश्वरप्रतिमाच्चचंडालपतितस्पृष्टाः असंस्पर्शोनिषिद्धस्पर्शः जीर्णाकालबाहुल्येनक्षारादिसंमर्धनेनविशीर्णा सव्रणा
एकदेशेनभग्नादेशिकउपासकः पूर्वोक्तेनविधानेनवैदिकेनसत्तोत्तम अचलादूषितामेवस्थापयेद्दिधिनोत्थितां पूर्वोक्तेनचलार्चाप्रतिष्ठा-
प्रकारेणएवंविधेनोत्थितापीत्यन्वयः वक्ष्यमाणप्रकारेणात्थितामित्यर्थः पूर्वपीठंपरित्यज्ययदन्यमपितद्भूतं ततोयथोक्तविधिना प्रासा
देसन्निवेशयेत् दुष्टपूर्वासनंपरित्यज्यान्यस्मिन्प्रासादगत आसनेयथोक्तेनाचला-र्चास्थापनप्रकारेणपुनःस्थापयेदित्यर्थः अतिजीर्णं-
तथाव्यंगांदारवीं शैलजामपि परित्यज्यन्यसेदन्यांपूर्वोक्तविधिनागुरुः संहारविधिनातत्रमंत्रान्संहृत्यदेशिकः सहस्रेनारसिंहेनहुत्वा-
तामुद्धरेद्गुरुः संहारविधिःप्रातिलोम्येनमंत्रान्कलोः संहृत्योत्थितनारसिंहेननृसिंहमंत्रेण होमद्रव्यमाज्यमन्यानादेशात् वृषसंयो-
जयित्वातुमंत्रेणोद्धृत्यदेशिकः दारवींदाहयेद्वन्हौशैलजांप्रक्षिपेज्जले धातुजांरत्नजांचापिप्रक्षिपेन्मकरालये अगाधेचान्यतोयेवा
क्षिपेन्नद्यामहाजले वृषस्कंधेचरज्ज्वासंयोज्यमंत्रेणपाशूपतेनोद्वाहयेदितित्रिविक्रमः यानमारोप्यजीर्णांवाच्छाद्यवस्त्रादिनागुरुः शंखदुंदु
भिनिर्घोषैर्गीतवादित्रनिःस्वनैः नीत्वागाधजलंरम्यंभागीरथ्यामहार्णवे विष्वक्सेनायवीर्येणप्रक्षिपेत्ताततोगुरुः यानमारोप्येत्यादि

पूर्वोक्त एवप्रतिपादनइतिकर्तव्यतोक्तयर्थम् विष्वक्सेनोद्देशेनवीर्येणबीजेनगुरुर्भागीरथ्यादिजलेतांप्रतिमांक्षिपेदित्यर्थः रत्नानिक्षिप्ता
न्यादायस्वयंदद्यात्तुदक्षिणांधेनवोदशवा पंचस्वर्णवस्त्राद्यलंकृताः जीर्णोद्धारेप्रदातव्यागुरवेविष्णुतुष्टये लिंगांतर्निक्षिप्तानिर
त्नान्यादाय स्वयंयजमानोदशधेनूःपंचवाहेमवस्त्राद्यलंकृता गुरवेदक्षिणांदद्यादित्यर्थः भोजनीयाविष्णुभक्ताःदेयमन्नमवारितम् त्रिरात्र
मुत्सवःकार्यःपंचसप्तत्यथापिवा बलिश्चविधिनादेयोयथोक्तेनसुरोत्तम यथोक्तेनचलार्चाप्रतिष्ठाप्रकारेण ततोनिवेदयेदन्यांप्रतिमांल
क्षणान्विताम् निवेदयेत्स्थापयेत् तत्क्षणादेवराजेंद्रतस्यदोषस्यशांतये संपत्तिर्वाविपत्तिर्वानापेक्ष्यांतत्रकारयेत् अपास्यपिंडिकांपू
र्वामन्यांतत्रनिवेशयेत् यद्द्रव्यायत्प्रमाणाचयामूर्तिश्चोद्धृताहरेः तद्द्रव्यातत्प्रमाणाचसामूर्तिस्तत्रकीर्तिता यत्प्रमाणंयदाकारंयन्मयं-
बिंबमुद्धरेत् तत्प्रमाणंतदाकारंतन्मात्रंतत्रविन्यसेत् विहायपिंडिकांपूर्वांतद्दिनेचापरांन्यसेत् द्वितीयेवातृतीयेवादिवसेस्थापयेद्धरिम्
अतऊर्ध्वंभवेद्दोषोविधिनापिनिवेशिते अनेनैवविधानेनलेप्यादींस्तुविवर्जयेत् कुड्यलिखिताःप्रतिष्ठापिताःप्रतिमालेख्याः अन्यद्विक-
ल्पयेत्तत्रतत्प्रमाणंतदाकृति एषसंक्षेपतःप्रोक्तोजीर्णोद्धारविधिस्तव सर्वेषामेवदेवानांवृषःसाधारणःस्मृतः योजीर्णविधिनाबिंबं-
संस्कुर्यान्मानवोभुवि फलंदशगुणंतस्यमूलान्नास्त्यत्रसंशयः वापीकूपतडागानांसुरधाम्नांसदानघ प्रतिमानांसभानांचसंस्कर्ता-
योनरोभुवि पुण्यंशतगुणंतस्यभवेन्मूलान्नसंशयः संशयोत्रनकर्तव्योजीर्णसंस्कारकर्मणि मूलाद्दशगुणंप्रोक्तंपुण्यंकूपेप्रतिष्ठिते-
प्रतिमायांशतगुणंकूपादेःपरिकीर्तितं प्रतिमादेर्दशगुणंजीर्णसंस्करणाद्भवेत् कूपप्रतिमयोर्दशगुणशतगुणयोरल्पत्वमहत्त्वापे

इयायव्यवस्था अग्निपुराणे सुस्थितंदुःस्थितंवापिशिवलिंगंनचालयेत् शतेनस्थापितंकुर्यात्सहस्रेणतुचालनम् पूजादिभिश्चसं
युक्तंजीर्णाद्यमपिसुस्थितम् पूजयारहितंयत्तद्दुष्टमपिदुःस्थितम् अयंचालननिषेधोविध्यातिरेकेणशतसहस्रसंख्येनूक्तसंख्यय
त्वाद्रोगने गोश्वाश्वाश्चेत्यत्रेवबहूपकारित्वाद्यःसहस्रंशताश्वमित्यादौ बाहुल्येनदर्शनाच्चेतिन्यायविदः शिद्धांतशेखरेतुहोमगने
असंख्येत्युक्तं यदपितत्रैव असुरैर्मुनिभिर्देवैस्तत्त्वविद्भिःप्रतिष्ठितम् जीर्णंवाप्यथवाभग्नंविधिनापिनचालयेदिति तदसुरादिप्रति-
ष्ठापितलिङ्गव्यक्तिविषयम् नतुदेवात्तद्व्यक्तिनाशेनतत्स्थानस्थापितेदानींतनताहृशव्यक्तिविषयम् जीर्णोद्धारप्रकारोप्यत्रैव- याम्येमंड
पमीशेवाप्यात्यग्द्वारेकतोरणम् विधायद्वारपूजादिस्थंडिलेसंप्रपूजयेत् द्वारपूजादिशिवकुंभपूजांतमितित्रिविक्रमः मंत्रान्संतर्प्यसंपू
ज्यवास्तुदेवांस्तुपूर्ववत् दिग्बलिंचबहिर्दत्वासमाचम्यस्वयंगुरुः ब्राह्मणान्भोजयित्वातुशंभुंविज्ञापयेत्ततः दुष्टलिंगमिदंशंभोशांतिरुद्ध
रणस्यचेत् रुचिस्तवास्तेविधिनाअधितिष्ठचमांशिव एवंविज्ञाप्यदेवेशंशांतिहोमंसमाचरेत् मध्वाज्यक्षीरदूर्वाभिर्मूलेनाष्टाधिकंशतम्
ततोलिंगंचसंस्थाप्यपूजयेत्स्थंडिलेतथा लिंगंलिंगाधिष्ठितदेवतांस्थंडिलेसंस्थाप्येत्यर्थः ओंव्यापकेश्वरायेतिनाम्नाऽनेनशिवार्चनम् ओं
व्यापकेश्वरायहृदयायनमइत्याद्युत्थम् अंगमंत्राः ततस्तत्रस्थितमंत्रंश्रावयेदस्त्रवंधतः सलःकोपीहयःकश्चिल्लिंगमाश्रित्यातिष्ठति लिंगंत्यक्त्वा
शिवाज्ञाभिर्यथेष्टंतत्रगच्छतु विद्याविद्येश्वरैःशंभुःशंभुरत्रभविष्यति सहस्रंप्रतिभागंचततःपाशुपतास्त्रतः हुत्वाशांत्यंबुनाप्रोक्ष्यपश्चा-
त्तुभोजयेत्ततः ब्रह्मशिलापिंडिलिंगात्मकदेवताभागत्रयसंस्कारार्थंपाशुपतास्त्रेण शांतिकलशोदकेन देवंसंप्रोक्ष्य कुशैःस्पृष्ट्वाहोम-

संरक्षणपाशुपतमंत्रंजपेत् दत्वार्घ्यंचविलोमेनतत्वतत्वज्ञकांस्ततः मूर्तिमूर्तीश्वरान्लिंगेपिंडिकासंस्थितान्गुरुः विसृज्यस्वर्णपा
शेनहृत्पस्कंधस्थयातया रज्ज्वावबध्वातपानीलाशैवमंत्रंगृणन्शनैः तज्जलेनिक्षिपेन्मंत्री तृप्त्यर्थंजुहुयाच्छतम् रक्षांविधायतद्धाम्नि-
महापाशुपतास्त्रतः लिंगमन्यच्चतत्रस्यंस्थापयेद्विधिवद्गुरुः विलोमेनपराङ्मुखसज्ञकंतत्वनत्वज्ञकंतत्वतत्वाधिपमूर्तिमूर्तीश्वराव
क्ष्यंते सिद्धांतशेखरे जीर्णोद्धारविधिंवक्ष्येसमासात्तत्रचोदितम् ईशान्यांदक्षिणेचापिमंडपंपश्चिमासुखम् कुर्वीतपूर्ववत्सर्वमेका
स्यंचैवतोरणम् पूर्ववत्सर्वकुंभादि द्वारपालार्चनंकुर्यात्स्थंडिलेग्नौशिवार्चनम् द्वारपालार्चनंमंडपप्रतिष्ठाप्रकारेण मंत्राणांतर्पणंकुर्या
द्वास्तुदेवार्चनंतथा मंत्राणादेवस्थापितकलानांअंतर्बहिर्बलिंदद्यात् शिवभक्तांश्चभोजयेत् शिवभक्तान्पन्यातित्रिविक्रमः द्वि
जान्कर्मकरादींश्चवतोविज्ञापयेच्छिवं दोषेलिंगमिदंदुष्टंशांतिरस्त्वस्यचोद्धृतौ तस्मादेवंविधानेनत्वाधितिष्ठमहेश्वर भवत्वितिव
चस्तेनप्रोक्तंतद्भावयेद्गुरुः नेनशिवेनप्रोक्तंशांतिर्भवत्विति वचोगुरुर्भावयेत् विज्ञाप्यैवंशिवंभक्त्याशांतिहोमंसमाचरेत् मधुनाज्ये
नदुग्धेनदूर्वाभिर्मूलमंत्रतः शतमष्टाधिकंमंत्रंप्रत्येकंजुहुयात्ततः मूलमंत्रमुच्चार्येत्यर्थः त्रिभिश्चमधुरैःसार्धंसमिधोघोरमंत्रतःशां-
त्यर्थंवर्तुलेकुंडेसहस्रंजुहुयाद्गुरुः अथवास्त्रेणमंत्रेणजुहुयाद्घ्यात्ततीस्ततः वभ्रीयात्कंकणंहैमंलिंगस्योत्तानकेकरे लिंगस्योत्तानकंकरंभा
वयित्वातत्रहैमंकंकणंवभ्रीयादित्यर्थः लिंगंसंस्थाप्यसंपूज्यपूर्वोक्तविधिनाततः सांगंसंपूजयेद्भक्त्यास्थंडिलेव्यापकेश्वरं लिंगाश्रितानि
भूतानिताडयेदस्त्रमंत्रतः यानिकानिचभूतानितिष्ठंत्याश्रित्यलिंगके त्यक्त्वाशिवाज्ञयातानिव्रजंतुस्थानमीप्सितं विद्याविद्येश्वरैर्युक्तःशिवो

लिंगे भविष्यति   इतिदत्वाशिवस्याज्ञांततोभागत्रयंगुरुः हुत्वाहुत्वास्त्रमंत्रेणतथापाशुपतास्त्रतः प्रतिभागंसहस्रंतुसिंचेच्छांतिघटोदकैः
ब्रह्मशिलापिंडिलिंगात्मकदेवभागत्रयंसंस्कर्तुंत्रिसहस्रमस्त्रेणाहुत्वातेनैवप्रतिभागंकलशसहस्रेणाभिषिंचेदित्यर्थः मूलमध्याग्रकैर्दर्भैःस्पृ-
ष्ट्वाजपमाचरेत् ब्रह्मशिलांमूलेन पिंडिंमध्येन लिंगमग्रेणदर्भैःस्पृष्ट्वेत्यर्थः प्राग्वत्पाशुपतास्त्रंचजपेद्धोमस्यसंख्यया सद्योजातादिवक्त्रै-
र्दद्यादर्घ्यंपराङ्मुखः दुष्टलिंगप्रतिपत्तिमाह सौधभूमौपरित्याज्यंदारुजंचाग्निनादहेत् सौधरूपानिर्मितंलिंगं लोहजंतेनकार्यस्याच्छैलजं-
चाप्सुनिक्षिपेत् स्वर्णाद्यष्टलोहनिर्मितंभग्नंतेनैवस्वर्णादिनातत्कार्यमित्यर्थः ततस्तत्तेजसानुलिंगान्मूर्तिमूर्तीश्वरानपि लिंगस्यानुवि-
सृजेत्तद्वदगमूर्तिस्थितानपि ततःस्वर्णपाशेनरज्ज्वागोचर्मजातया वृषस्कंधस्थयाबद्ध्वालिंगंपीठंचवर्मणा। शिवमस्त्वितितद्वाक्यंस-
ञ्जनोधारयन्गुरुः उद्धारार्थंचलिंगस्यतोवृषोप्रेरयन्ततः बहिर्नीत्वाततोलिंगंपीठब्रह्मशिलावृषं रथादिकंसमारोप्यसमुद्रेनिक्षिपेत्ततः
स्थूललिंगात्पृतोबद्धागजंवाप्रेरयद्गुरुः सौधभूमौपरित्यज्यदारुजंचानलेदहेत् सर्वंवानिक्षिपेत्तोयेलिंगंवाप्रतिमादिकं ततःपाशुपतास्त्रे-
णशांत्यर्थंजुहुयाच्छतम् लोकपालादिभिस्तद्वद्धारास्त्रशात्येशतशतम् प्रतिदेवतशतंजुहुयादित्यर्थः रक्षांकुर्याच्चतद्वाग्निमहापाशुपता
स्त्रतः तन्मानंतन्मयंलिंगंतत्रसंस्थापयेत्पुनः प्रतिष्ठोक्तेनमार्गेणसर्वकर्मसमाचरेत् हर्म्यस्यपरिवाराणांप्राकारादेःसमुद्धृतौ सर्वेषाम-
पिजीर्णानामयमेवविधिःस्मृतः कृत्वाचदक्षिणांदद्याद्गुर्वादिभ्योयथोदिताम् यत्पुण्यंस्थापनेप्रोक्तंतत्फलंएतदुद्धृतौ अयमत्रनिर्गलितोर्थः ल-
क्ष्मोज्झितस्फुटितविशीर्णश्वपचसेवितानांलिंगानांतादृशीनांबाहुपादशिरःकर्णनासास्यहीनानांविध्युक्तप्रकारेणचालनंजलादौप्रतिपादनंयत्स्व

त्वा नूतनप्रकारेण तस्मिन्नेव स्थाने पूर्वसजातीयद्रव्यनिर्मितं तन्मानं तदाकारं लिंगं तादृशीं प्रतिमां वा स्थापयेत् अतिजीर्णमिति पूर्वोक्तोऽप्यथवा-
क्यात् पीठं च चालितं लिंगमिति त्यजेत्तद्दोषितं लिंगमिति बाहुपादशिरोहीनामिति यद्रूप्यं स्वप्रमाणमिति सिद्धान्तशेखरोक्तेः अस्माद्देववाक्य-
निचयात् प्रतिपत्तिप्रयोजकदोषाभावाद्वस्तुजनिम्नस्य विषमस्थस्य दिङ्मूढानां च वैधचालनं तेषामेव पुनः स्थापनं च भग्नचूर्णयोस्तदपवादानां-
प्रतिपादनपूर्वकं नूतनानां स्थापनं अनेकशकलत्वेन चूर्णितत्वेन च उद्धारपुनःस्थापनविध्योरप्रवृत्तेः चालितचलितपातितपतितमध्यस्था-
नां तु नोत्थापनत्यागः किंतु तेषामेव पुनःस्थापनं उत्थूतस्योत्थापनासंभवान्निर्दुष्टत्वेन प्रतिपत्तिविध्यप्रवृत्तेश्च एतेनैव नदीवेगोन्मत्तशत्रु-
चोरहस्त्याद्यपहृतानां लाभे तान्येव पुनः स्थापनीयानि तेषामलाभे तादृशान्यन्यानि स्थाप्यानि निषिद्धस्पर्शदूषितनिषिद्धजलस्पृ-
ष्टविप्रक्षालनजदूषितपतिताद्यर्चितस्तेषु च विण्मूत्रादिदूषितानां स्वस्थानस्थितानामेव पुनःसंस्कारो नोद्धारो नापि प्रतिपत्तिः अतिजीर्णमि-
ति पीठं च चालितमिति त्यजेत्तद्दोषितं लिंगमिति पूर्वोक्तवाक्यनियमात् अनुद्धृतानामेव तत्रैव संस्कारसंभवात् स्थलान्तरनयनविध्यभा-
वाच्चलितस्याविकृतस्य च विधूद्धृतादेरप्येवमेव स्थानाच्चालितस्य तु पुनस्तत्रैव प्रतिष्ठा स्थानान्तरविधानाभावाच्चलितस्याविकृतस्य च त्या-
गः तादृशस्यान्यस्य प्रतिष्ठा स्थूलपूर्वपिंडिब्रह्मशिलयोरप्युद्धारः प्रतिपत्तिविधिना पिंडिकान्तरादिनिवेशश्च व्यंगे तु पूर्वपिंडिकादीनामप्यु-
त्सेऽप्येवमेव पिंडिकाद्यभावे तु पिंडिकाद्यंतरस्थापनमात्रमित्यादि दुष्टलिंगानामित्यग्निपुराणवाक्यात् लिंगे पीठादिके वापीति सिद्धान्तशेखरो-
क्तेः पूर्वापि परित्यजेदिति हयशीर्षवाक्यात् सुवर्णादिनिर्मितभंगाद्यैस्तु तेनैव सुवर्णादिना तादृशं तावत्परिमाणं च लिंगादि कृत्वा तत्रैव पुनः स्थाप्यमित्येव वस्तु ॥

वर्णादिनासादृशंकर्तुंनशक्यते तदासमुद्रेनिक्षिपेत् रत्नजातुसमुद्रएवक्षेमत्वा रत्नजायदिदग्धापिस्वकांतिंनजहातितदासैवस्थाप्येति
त्रिविक्रमः लोहाद्यंछिन्नागमितिसिद्धांतशेखरवाक्यात् धातुजांरत्नजांवा पीतिहयशीर्षवाक्यात् इतिजीर्णोद्धारविधिः अथास्य
प्रयोगः यजमानउद्धार्याद्दक्षिणस्यामीशान्यांवामश्चिमद्वारेकतोरणंमंडपंतन्मध्यभागेवेदिंपूर्वभागेवर्तुलंचतुरस्त्रंवापश्चिमेवास्तुपीठमु
त्तरवालुकायाःस्थंडिलंचकृत्वा देशकालादिस्मृत्वा मोलफलाच्छतगुणफलकामोल्पप्रतिमायांतुदशगुणफलकामोवाजीर्णादिदोषदु
ष्टलिंगस्यप्रतिमायावाउद्धारमुत्सृजनंकरिष्येइतिसंकल्पयेत् पिंडिकावृषगरुडप्रासादकलशेषु ईश्वरप्रीतिकामइतिविशेषः सर्वत्रेश्वर-
प्रीतिकामोवा ततोगणेशपूजास्वस्तिवाचनमातृकापूजननांदीश्राद्धानिकृत्वनप्रतिष्ठावत्कृत्वा तद्वदेवब्रह्माचार्यसदस्यान्द्वात्रिंशत्षोडशाष्टो
चतुरोवाऋत्विजोद्वारपालांश्चाष्टौचतुरोवावृत्वा वस्त्रालंकारमधुपर्कादिभिस्तान्पूजयेत् अथाचार्योमंडपपूजादिशिवकुंभपूजांतंकृत्वा
वास्तुमंडपेमहावेद्यांचदेवतास्थापनंकृत्वा पीठादौप्रणवेनासनपूजनंकृत्वा ओंव्यापकेश्वरायएह्येहिनमः ओंव्यापकेश्वरायहृदयायनमः
ओंव्यापकेश्वरायशिरसेस्वाहा ओंव्यापकेश्वरायशिखायैवषट् ओंव्यापकेश्वरायकवचायहुं ओंव्यापकेश्वरायअस्त्रायफट् इतिमंत्रैः
शिवमर्चयेत् देवतांतरोद्धारेमूलमंत्रेणार्चयेत् ततोग्निंसंस्थाप्य लिंगचालनार्थंलिंगमंत्रेणाज्यमाहुतिसहस्रंहुत्वा मंडलदेवताहोमंपूर्णा
र्णाहुतिंचकृत्वा जीर्णभग्नमिदंदेवसर्वदोषावहंनृणां अस्योद्धारेकृतेशांतिःशास्त्रेस्मिन्कथितात्वया जीर्णोद्धारविधानंचनृपराष्ट्रविवर्ध
नं तदत्राधिष्ठितंदेवप्रोद्धरामितवाज्ञया देवस्यजीर्णदोषंश्रावयित्वा शिल्पियुतःशिवंसांगंविसृज्य यजमानस्यसुवर्णकंकणंबध्वासौ

षर्णरथनिर्वेणोत्सृत्यरथमारोप्य तरुच्छायेपर्यंतदेशेवृक्षमूलेगाधनदीन्हदेवा मदेवेनिक्षिपेत् प्रतिमांतुप्रणवेनक्षिपेत् दारुजंचेत्तदुत्तरेदहेत् रत्नजं
लिंगंयदिनिजकांतिमजहद्देवभवतितदातद्देवपूर्ववत्स्थापयेत् सुवर्णादिमयंतद्देवसांगंकृत्वास्थापयेत् प्रासादेत्वयंविशेषः प्रासादमंत्रयत्नवज्रनकूशि
कयावासंयोज्य नूतनप्रासादसिद्धिपर्यंतंखड्गादिकमर्चयित्वा प्रासादेसिन्दूरवड्गादिमंत्रान्यथास्थानं प्रतिष्ठाकालेन्यस्ययजमानमभिषिंच्य
ततोलिंगंप्रतिमांवा तथैवविधिवत्स्थापयेत् ध्रुवाद्यौरित्यादिमंत्रान्पठित्वास्थिरीकृत्यबहुसंपूज्य प्रार्थयेत् ज्ञानतोज्ञानतोवापियथोक्तंनकृतंयदि न
त्सर्वंपूर्णमेवास्तुत्वत्प्रसादान्महेश्वर कर्तूराज्ञःप्रजानांचशांतिर्भवतुसर्वदा अस्माकंशिल्पिनांचैवसप्रीतोभवसर्वदेति ॥ इतिश्रीसेंग
रवंशावतंसश्रीमहाराजाधिराजभगवंतदेवादिष्टमीमांसकशंकरभट्टात्मजनीलकंठविरचितेश्रीमद्भगवंतभास्करेप्रतिष्ठामयूखेषष्ठः समाप्तः॥

॥अथास्यानुक्रमणिकालिख्यते ॥

अ॰ क्र॰ २६ म॰

हें पुस्तक मुंबई येथें शके १७८६ रक्ताक्षीनामाब्दे श्रावण कृष्णपक्ष ११ शनिवारीं कृष्णाशास्त्री गुर्जर याणीं आपल्या शिलायंत्रांत मुद्रित केलें असे ॥

॥ इति प्रतिष्ठामयूखः समापितोयम् ॥